339
1985

बिजविद्दनी

Beeju Vridhi

341
1985

अथबीजनिरूपणप्रारंभः॥श्रीगजानन॥संख्या ४९८१

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

॥श्रीगणेशायनमः॥श्रीसरस्वत्यैनमः॥श्रीगुरुभ्योनमः॥शिवयोर्भजनानिगौरवाद्य स्ततत्लाधनकुंजरास्यरूपं॥ अपहंतुमसांतरंतमस्तरसतानंदमयंमहोमहायः॥१॥ यदीयचरणांभोजस्मर्तुःसकळसिद्धयः॥भवंतिवश्यावर्तिन्यःसिद्धेशीतांमहं भजे॥२॥ मिहरमिववराहमिहरं वंदेसंदेहभेदिनंजगतां॥ज्योतिश्चक्रविभावनहेतुंजगदेकचक्षुरक्षुद्रं॥३॥ कविबुधजननमूर्धनिस्फुरंतं कविबुधसंततसेवनीयपाश्वं॥ गणितनिपुणतांप्रपंचयंतंप्रणमतभास्करमीप्सितार्थसिध्यै॥४॥ कदापिनैवसंभ्रमःस्थितश्चभौममंडले॥अपूर्वमार्गमाश्रयन्जयत्यपूर्वभास्करः॥५॥आसादसीमगुणरत्ननिधानकुंभः कुभोद्भवाभरणदिग्वलयनातलाभ॥आशैववल्लिनविशेषकलानुवर्नीश्रीकेशवः सुगणिनागमचक्रवर्त्ती॥६॥तस्मादभूद्भुवनभूषणभूतमूर्तिःश्रीमानगण्यगुणगौरवगेयकीर्तिः॥ ज्योतिर्विदागमगुरुर्गुरुसंप्रदायप्रज्ञातशास्त्रहृदयःसदयोगणेशः॥७॥भ्रातुःसुतस्तस्ययथार्थनामान्नसिंह इत्यद्भुतरूपशोभः॥अवर्धयद्योजगतामभीष्टंप्रत्यहमाश्चर्यकरःसुराणां॥८॥तच्छिष्योविष्णुनामासजयतिजगतीजागरूकःप्रविष्टः शिष्टानामग्रगण्यःसकलगणितगणिताम्नायविद्याशरण्यः॥यद्वक्त्रोन्मुक्तमुक्ताफळविमलवचोवीचिमाळागलंतीहृद्याःसिद्धांतलेशाःजगतिविदधतेज्ञेपिसर्वज्ञगर्वं॥९॥तस्मादधीत्यविधिवत्तज्ज्ञानवान्ज्योतिषांगुरोः॥कृष्णोदैवविदांश्रेष्ठस्तनुतेबीजपल्लवं॥१०॥अव्यक्तकालादिबीजमित्युक्तंशास्त्रकर्तृभिः॥तद्व्यक्तीकरणंशक्यंनविनागुर्वनुग्रहं॥११॥अथशंडित्यगोत्रमुनिवरवंशावतंसजडबीदनगरनिवासकुंभोद्भवभूषणदिग्भूषणसकळागमाचार्यवर्यश्रीमहेश्वरोपाध्यायतनयनिखिलविद्यावाचस्पतिगणितविद्याचतुराननधरणितरणिः ॥१॥ श्रीभास्कराचार्यःस्वगणितरूपंसिद्धांतंविकीर्षुस्तदुपयोगितयातदध्यायभूतंव्यक्तगणितमुक्तवातथाभूतव्यक्तगणितमारभमाणःप्रत्यूहव्यूहनिरासायशिष्टाचारपरिपालनार्थंचमंगळमाचरन्शिष्यशिक्षार्थंतदुपजानि

343
1785

कतयानिबध्नाति॥उत्पादकमिति॥अव्ययमन्वयः॥तद्व्यक्तंईशंगणितंचवंदे॥इष्टापक्षेयतोर्लिंगपरिणामेनयदितिस्थानेयंतदितिस्थानेतंचेतिबोधव्यं॥अव्यक्तंप्रधानं॥सांख्यशास्त्रेजगत्कारणतयाप्रसिद्धं॥ईशंसच्चिदानंदरूपं॥वेदांतवेद्यं॥गणितमंत्राव्यक्तमेव॥अव्यक्तपदस्यार्थाव्यक्तंगणितमितिनदिशेषणस्यविवक्षितत्वात्॥तन्नमस्कारेणतदधिष्ठात्रीदेवतानमस्कृताभवति॥शाळग्रामशीळादौतथादर्शनात्॥तत्रप्रधानपक्षेकिंतद्व्यक्तं॥सांख्याःयदुपेरुत्पादकंप्रवदंति॥बुध्येस्तत्वविशेषस्यमहदाख्यस्य॥उत्पत्तिरत्राभिव्यक्तिः॥यतस्तेसत्कार्यवादिनः॥ननुप्रधानमचेतनंकथंकार्यमुत्पादयेदित्यतउक्तंपुरुषेणाधिष्ठितंसदिति॥यथाहिकुलालादीनांचेतनेनाधिष्ठितंकपालादिघटोत्पादकंतद्वदित्यर्थः॥अत्रसांख्याःसेश्वराःश्रीमद्भगवत्पतंजलमतानुसारिणोज्ञेयाः॥निरीश्वराहिकपिलमुनिमतानुसारिणः॥पुरुषनिरपेक्षमेवप्रधानमुत्पादकंप्रवदंति॥तदुक्तमीश्वरकृष्णेनसप्तत्म्यां॥वत्सविवृध्यर्थंनिमित्तंयथाप्रवृत्तिरत्रस्य॥पुरुषविमोक्षनिमित्तंतथाप्रवृत्तिःप्रधानस्येति॥ननुतादृशंप्रधानेकिंप्रमाणमित्यताह॥कृत्स्नस्यव्यक्तस्यैकंबीजमिति॥समस्तस्यव्यक्तस्यकार्यजातस्यएकंबीजमुत्पादनं॥तथाचवियदादिकार्यजातंसोपादानंकार्यत्वात्घटवत्॥इत्यनुमानेलाघवसहकृतेतत्रप्रमाणमितिभावः॥नचेश्वरेणार्थांतरता॥तस्यनिर्विकारस्यापरिणामितयाअनुपादानत्वात्॥परिणामित्वेपिकथमचेतनंपरिणामःस्यादितिं॥पुरुषव्यवच्छेदः॥तन्मतेपुरुषस्यानुपादानत्वात्॥यतस्तेवदंतिपुरुषस्तुपुष्करपळाशवत्निर्लेपइतियथावेदांतमतेमायाब्रह्मणोहेपिप्रपंचस्योपादानेतद्वदित्यर्थः॥अथेशपक्षे॥सांख्याःसम्यक्ख्यायतेज्ञायतेआत्मायायासासंख्याआत्माकारांतःकरणवृत्तिःसायेषांतेसांख्याःआत्मज्ञानिनः॥सत्पुरुषेणविवेकादिसाधनचतुष्टयसंपन्नेनमताअधिष्ठितमादरनैरंतर्याभ्यांश्रवणादिविषयीकृतंसंतंयेबुध्येस्तत्वज्ञानस्यो

त्पादकं भवतीति॥ननु तस्याजनकत्वादुत्पिजनकत्वेमानाभावइत्यतआह॥समस्तव्यक्तस्यकार्यजातस्य
एकसाधारणंबीजमुत्पादनमित्यर्थः॥यतोवाइमानिभूतानिजायंतइति॥तत्सृष्ट्वातदेवानुप्रविशादिति॥तस्मा
द्वाएतस्मादात्मनआकाशःसंभूतइत्यादिश्रुतयस्तदुपादानत्वेप्रमाणमितिभावः॥ननुनिर्विकारस्योपादा
तित्वविक्रियावत्त्वंसादितिचेत्सत्यं॥उपादानंद्विविधं॥परिणाममानंविवर्तमानंचेति॥तत्रपरिणामिविक्रियावत्॥
परस्येशस्यपरिणामित्वेपादानत्वानोपपद्यते॥तथापिविवर्तमानोपादानत्वेनकाप्यनुपपत्तिरस्तीत्यतआह॥विव
र्तेन॥मयायाउपादानत्वपक्षेपिविवर्तमानस्योपादानत्वस्यात्रविवक्षितत्वात्एकमित्युक्तं॥अथगणितपक्षे॥
सांख्याःसंख्याविदोगणकाःसत्पुरुषेणस्वरूपयोग्येनाधिच्छिन्नमभ्यस्तंयुद्धयेःशिरोमणिवक्ष्यमाणप्रश्नोत्त
रार्थादिज्ञानस्योपादकंभवतीति॥ननुप्रश्नोत्तरार्थादिज्ञानस्योपादकंव्यक्तमेवास्तिगुणघ्नमूलोनयुतस्यराशे
र्दृष्टस्ययुक्तस्यगुणार्धकृत्या॥मूलंगुणार्धेनयुतंविहीनंवर्गीकृतंप्रकृतिरभीष्टराशिरित्यादिकुट्टीकारेणतद्बु
द्धिस्थीकृतज्ञेवपस्तत्कपदंपकभावबोधेसतिव्यक्तमेवोपादानंस्यादित्यभिप्रायेणाह॥स्याद्वा
योयुक्तिर्वर्गतोयमगुणात्सप्तामरास्तोनिताः॥नागाऽऽगदिगंकाःपरमतस्तेनाघऽऽनोभवेद्व्यासार्धेषुगु
णाब्धिपावकमितेकोनिज्यकातोरविर्हितिवा॥यतोयावत्तावदादिवर्णकल्पनानिरपेक्षैर्गुणभजनादिमार्गैः
क्रियमाणंगणितंव्यक्तमित्युच्यते॥तत्कथमुच्यतेप्रश्नोत्तरार्थज्ञानरूपायाबुद्धेरुपादकमव्यक्तमित्यतआ
ह॥व्यक्तस्येति॥व्यक्तस्ययावत्तावदादिवर्णकल्पनानिरपेक्षस्यएकंबीजंमूलंमितियावत्॥युज्यापक्रमे
त्यादिगणितप्रकारस्यवर्णकल्पनामूलत्वादितिभावः॥श्रेयांसिबहुविघ्नानीत्यत्रत्वान्नमस्कारत्रयमुचित
मिव॥ग्रंथकर्तुस्समाप्तिजनकत्वंविघ्नध्वंसकत्वंवाप्रकृतानुपयुक्तत्वाच्चग्रंथविस्तरभयाच्चमण्यादौविस्तरेण ॥२॥

त्वाच्चनेहव्यक्तपाद्यतेतत्तएवद्रष्टव्यं॥इदानीमस्यसमस्तकार्यजनकत्वंवदतातत्प्रणामस्यग्रंथसमाप्तिप्रत्ययादिरूपं
फलंकेमुतिकन्यायेनसूचितं॥यतोयोयदिष्टमनिष्टंवाकर्तुंशक्तस्तस्यप्रणतस्यतदिष्टंस्वदेष्टुस्तदनिष्टंचविद
धाति॥इदानीस्तत्सर्वंकर्तुंशक्तःस्वप्रणतस्यसर्वमिष्टंविदध्यात्॥ग्रंथसमाप्तिप्रत्ययादिरूपंकिमुतेति॥अत्र
सांख्यवेदांतिमतव्यक्तपादनंग्रंथविस्तरभयान्नकृतं॥तत्तत्तएवागंतव्यं॥इदानींप्रेक्षावत्प्रवृत्तिहेतुविषयादि
चतुष्टयसंगतिंचशास्त्रिन्यादर्शयति॥पूर्वंप्रोक्तमितिं॥अस्यार्थः॥तस्माद्येनोबीजस्ययावत्तावदादिवर्णक
ल्पनाभिःक्रियमाणस्यगणितस्यक्रियामितिकर्तव्यतावच्छिन्ना॥यस्माद्व्यक्तवर्णकल्पनानिरपेक्षंगणितंपूर्वोक्तं॥ततःकिमित्यतआह॥अव्यक्तबीजमितिं॥अव्यक्तंबीजगणितंबीजंमूलंयस्य॥तथाचपू
र्वंयाव्यक्तमपिव्यक्तेनतावत्समव्यक्तयाज्ञायतेयावद्बीजक्रियानोपपद्यते॥तत्किंव्यक्तज्ञानार्थमेवाद्यमारंभः॥
नेत्याह॥यस्माच्चसुधीभिरव्यक्तयुक्त्याविनाप्रश्नाज्ञातुंनशक्याः॥मंदधिभिस्तुनितांतं॥ज्ञातुमशक्याएवे
त्यर्थः॥प्रश्नाश्चात्रसिद्धांतशिरोमणौत्रिप्रश्नाधिकारेवक्ष्यमाणाभाकर्णेखगुणांगुकेकिकसखेयाम्योसु
जस्त्र्यंगुकइत्यादयः॥परप्रश्नाध्यायोक्ताइतरेपृच्छकेछावज्ञातइत्यपिज्ञातव्याः॥यद्वातस्माद्व्यक्तंपूर्वोक्तं
इदानींबीजक्रियांवक्ति॥यस्मादव्यक्तयुक्त्याविनाप्रश्नाःप्रायोबहुधाज्ञातुंनशक्याःतेनैवमुपलभ्यतेकेच
नप्रश्नाव्यक्तयुक्त्यापिज्ञातुंशक्यंतेतेवक्ष्यतिचप्रश्नाध्यायेतेषांचबीजेनवकुट्टकेनवर्गप्रकृत्याचतथोत्तराणि॥तेकेनयंत्रैःकथितानितेषांबाकावबोधेकतिचिच्चचक्ति॥तथाचप्रश्नोत्तरार्थज्ञानसाध
नंह्यव्यक्तमपिभवत्यभ्याहितंव्यक्तमेतत्कथंपूर्वोक्तमित्यतआह॥अव्यक्तबीजमिति॥अव्यक्तंस्यबीज
कं॥तथाचयावद्यतगणितोक्तभिन्नपरिकर्माष्टकत्रैराशिकंनज्ञायतेतावदव्यक्तेप्रवेशोनभवति॥

त्यव्यक्तं पूर्वं प्रोक्तमिति भावः॥ तदेवं व्यक्तसापेक्षतया व्यक्तानंतग्रहगणितोपयुक्ततयाग्रहगणितात्प्रागव्य
क्तस्यारंभोयुक्तइतिसंगतिः प्रदर्शिता॥ असंगतप्रलापोहिप्रेक्षावतामनवधेयवचनोभवति॥ बीजक्रियोच्च
वक्ष्मिइतिवदताएकवर्णसमीकरणानेकवर्णसमीकरणमध्यमाहरणभावितरूपभेदचतुष्टयभिन्नंगणितंवि
षयःप्रदर्शितः॥ तदुपयुक्ततयाधनर्णषड्विधत्वषड्विधकरणीषड्विधकुट्टकवर्गप्रकृतिचक्रवाळान्यपिविषय
त्वेनप्रदर्शितानि॥ विषयस्यशास्त्रप्रतिपाद्यप्रतिपादकभावःसंबंधोबीजक्रियोच्चक्ष्मिइत्यनेनप्रदर्शितः॥ य
द्॥ ज्ञानेविषयेप्रयोजनेचवेदबाह्ये हेतुकैराधुनिकैः कल्पितमिदमुतपारंपर्यागतमितिसंशयेनतूतनक
ल्पितमेवेदंशास्त्रमितिभ्रमेणवाप्रेक्षावंतःशिष्टाप्रवर्तेरन्॥ तदर्थंपारंपर्यलक्षणसंबंधकथनमावश्यकं॥
तच्चबीजगणितस्यप्रश्नज्ञानसाधनत्वंवदताआचार्येणकृतमेव॥ तथाहि॥ अव्यक्तगणितंप्रश्नज्ञानसाध
नत्वाज्ज्योतिषंज्योतिषत्वाद्वेदांगंवेदांगत्वाद्ब्रह्मणः सकाशाद्गुरुशिष्यादिद्वारापारंपर्येणागतमित्यतंभव
ति॥ उक्तंचनारदेन॥ अस्यशास्त्रस्यसंबंधोवेदांशमितिधात्वतइति॥ आचार्योपिगोलाध्यायेस्पष्टीकरिष्य
मनायांवक्ष्यति॥ दिव्येज्ञानमतिज्ञायोद्दिव्ययदृषिभिर्ब्रह्मंवशिष्ठादिभिः पारंपर्यवशाद्गृहस्यमवनींनी
तंप्रकाश्यतेतनः॥ नैतद्विधिकृतघ्नदुर्जनदुराचाराचिरावसिनोस्यादायुः सुकृतक्षयोमुनिकृतोसीमामि
मासुस्थतः॥ इतिप्रयोजनंतुप्रश्नोत्तरार्थंज्ञानंगोळज्ञानंवापरं॥ परंपरयाजगतःशुभाशुभफलादेशश्च
यतोवक्ष्यतिगोलाध्याये॥ ज्योतिःशास्त्रफलंपुराणगणकैरादेशइत्युच्यतेनूनंलग्नबळाश्रितः पुनरिदं
तत्स्पष्टंविराश्रयं॥ तेगोळाश्रयिणोतरेणगणितंगोळोपिनज्ञायतेतस्माद्योगणितंनवेत्तिसकथंगोळा ॥३॥
दिकंज्ञास्यतीति॥ नारदोपि॥ प्रयोजनंजागतःशुभाशुभनिरूपणमिति॥ योज्योतिषंवेत्तिनरः ससम्यक्

सुरव्यंतुशास्त्रप्रयोजनमेवास्यप्रयोजनमिति॥ योज्योतिषंवेत्तिनरः ससम्यक् धर्मार्थकामान्लभतेयशश्चेति
इहाधिकारीतुप्रश्नादिजिज्ञासुः पठितव्यक्तश्चसचद्विजएव॥ यदृक्ष्यतिसिद्धांतशिरोमणौ॥ तस्माद्द्विजैरध्य
यनीयमेतत्पुण्यंरहस्यंपरमंचतत्त्वमिति॥ तत्रएवकारस्यपाठक्रमेणयोज्योतिषस्यावश्याध्यायनीयतापतीय
ते॥ द्विजैरेवेतियोजनेद्विजातिशिक्षैः अनध्ययनीयताचप्रतीयते॥ हेअप्यत्रयुक्तेइति॥ ननुयद्वृत्तिव्याख्यानेअव्य
क्तबीजमित्यत्रतत्पुरुषसमासेव्यक्तस्यकृत्स्नस्यतद्बीजमितिनविरोधइतिचेत्॥ नकृत्स्नपदस्योक्तत्वात्॥
नचव्यक्तस्यकृत्स्नस्यतद्बीजमिति॥ बीजस्यव्यक्तमूळकत्वेपिअविरुद्धमितिवाच्यं॥ व्यक्तज्ञानेव्यक्तज्ञानं
अव्यक्तज्ञानंव्यक्तज्ञानंइतिपरस्पराश्रयस्यदुरुत्तत्वात्॥ नैवं॥ गंगागंगेतियोब्रूयाद्योजनानांशतैरपि॥ मु
च्यतेसर्वपापेभ्यइत्यादौसर्वशब्दस्येवव्यक्तेकृत्स्नपदस्यबहुत्वपरत्वात्॥ इतरथाव्यक्तानंतरंअव्यक्तारंभानु
पपत्तेः॥ अतएवकश्चिन्व्यक्तभागोव्यक्तमूळंकश्चिदव्यक्तभागोव्यक्तमूळमितिविरोधपरिहारोयुक्तएव॥
कृत्स्नपदेसंकोचस्यावश्यमभ्युपेयत्वात्॥ नहिव्यक्तोक्तसंकळनान्यवकळनादिष्वपिअव्यक्तंमूळमितिके
नाप्युररीक्रियते॥ किंतुगुणघ्नमूळोनेत्यादावेवकिंच॥ कृत्स्नपदेसंकोचाभावेपिनकश्चिद्दोषः॥ तथाहि॥
यथागुणघ्नमूळोनेत्यादिव्यक्तगणितस्याव्यक्तमूळकत्वेपिनस्वरूपनिर्वाहायतदपेक्षाकिंतूपपत्तावेव॥
तद्वदत्रिवळस्यापिव्यक्तस्याव्यक्तमूळकत्वेकुतस्त्यःपरस्पराश्रयइत्यळंपल्लवितेनअव्यक्तक्रियानावदव्य
क्तषड्विधाधीनातदपिधनर्णषड्विधानंअतःप्रथमंतस्तदत्रप्रतिपादनीयं॥ तत्राव्यक्तकळनादीनांसकल
पूर्वकत्वात्॥ धनर्णसंकळनंतावद्रूपजातिकापूर्वाधेनाह॥ योगेयुतिः स्यात्समयोः स्वयोर्वा धनर्णयोरंत
रमेवयोगः॥ समयोः ऋणयोः स्वयोरर्धनयोर्वायोगेकर्तव्येयुतिस्यात्॥ एतदुक्तंभवति॥ ययोर्योगः कर्तव्यो

स्तिनोरूपात्मको वर्णात्मको करण्यात्मकोवा राशीयद्यु भावपि ऋणगतौ भवतस्तदा तयोः राश्योर्योगः कार्यः॥ कार्यः क्रमादुक्रमतोथवा कयोगइति व्यक्तगणितोक्तो योगो विधेयः॥ सएवात्रयोगो भवति॥ करण्यास्तुयोगोन्तरं वा॥ योगंकरण्योर्मूहतिप्रकल्प्येत्यादिवक्ष्यमाणप्रकारेण विधेयइति द्रष्टव्यं॥ एवंबहूनामपि॥ एवं सजातीययोगउक्तः॥ यत्रत्वेकराशिर्धनमितरश्चऋणं तयोर्योगे कर्तव्ये किंकर्तव्यंतदाह॥ धनर्णयोरंतरमेव योगइति व्यक्तरित्यायदंतरंसंपद्यतेसएवधनर्णयोगइत्यर्थः॥ शेषधनर्णत्ववच्चात्रयोगस्यापिधनर्णत्वं ज्ञेयं॥ अथोक्तेर्थेशिष्यबोधार्थमुदाहरणचतुष्टयमुपजातिकयाह॥ रूपत्रयंरूपंचतुष्टयंचेतिहयमप्यृणमित्येकं॥ हयमपिधनमितिद्वितीयं॥ आद्यंधनंपरमृणमितितृतीयं॥ प्रथममृणमितरद्धनमितिचतुर्थं॥ एवंचत्वार्युदाहरणानि॥ धनर्णयोरितिधनेचऋणेचधनर्णं॥ धनर्णवधनर्णंचधनर्णेतयोः धनर्णयोः धनयोः ऋणयोः धनर्णयोरित्यर्थः॥ चतुर्थप्रश्नस्यतृतीयंतर्भूतत्वात्पक्षत्रयमेवदृष्टमिति॥ नन्विदं धनमिदंऋणमितिवाद्रव्यंव्यक्तमिदंअव्यक्तमित्यादिवाकथमवधेयमित्यत आह॥ अत्ररूपाणामव्यक्तानांवा यद्यप्यक्षराण्युपलक्षणार्थंआत्तेरव्यानि॥ तथायानिऋणगतानितानिर्ऊर्ध्वबिंदूनिचेति भ्रांतिरोहितार्थइदंतायद्यप्यृणत्वादिकमालापतएवावगंतुंशक्यंतथापिआलापबहुत्वेऋणत्वादौभ्रांतिशंकिनोवास्यादुपस्थितिः॥ लाघवंचनस्यादित्यूर्ध्वबिंदूदिलिखनंयुक्ततरं॥ धनर्णत्वंतुव्यवकलनोपपत्तौविवरिष्यामः॥ अत्रप्रथमोदाहरणेन्यासः॥ ३।४ धनर्णयोरंतरमेवयोगइतिज्ञानं १ चतुर्थेन्यासः ३।४ अंतरमेवयोगइतिज्ञानं १॥ अत्रोपपत्तिर्लौकिकसिद्धेव॥ तथाहि॥ देवदत्तस्यमुद्रात्रयमृणमेकंतदपिमुद्राचतुष्टयमृणमित्यभिहितेमुद्रासप्तकमृणमस्तीतिप्रतीतिरस्त्यगोपालादिविपालेभ्योअविपालोजानाबालःस्यात्बालस्यादजाजीवःआलापेभ्योव्य

॥ ४॥

३५१
वि० १

वहारसिद्धा॥ एवंदेवदत्तस्यमुद्रात्रयमेकंधनंअन्यदपिमुद्राचतुष्टयंधनमस्तीत्यत्रके स्वस्यमुद्रासप्तकमितिविलसतिसर्वजनानांव्यवहारः॥ अतउक्तंयोगयुतिःस्यात्क्षययोः सयोर्वेति॥ अथदेवदत्तस्यमुद्रात्रयंधनमस्तिमुद्राचतुष्टयमप्यृणमस्तीतिनास्यधनमस्तिकिंतुमर्णस्यमुद्रात्रयंदत्तेएकैवमुद्रास्यर्णमस्तीतिवरीवर्तिसकलजनसाधारणोव्यवहारः॥ एवंदेवदत्तस्यमुद्रात्रयमृणंमुद्राचतुष्टयंधनमस्तीतिवरीवर्तित्यभिहितेनास्यस्वर्णंकिंतुमुद्रैकाधनमस्तीतिसकललोकप्रतिपन्नोव्यवहारः॥ अतउक्तंधनर्णयोरंतरमेवयोगइति॥ ननुव्यक्तेभिन्नानामभिन्नानांचसंकलनव्यवकलनादिपृथक्पृथक्उक्तंअत्रतुभिन्नानांसंकलनव्यवकलनाद्यंनपृथगभिहितमस्तितत्कथंकर्तव्यमितिनदाह॥ एवंभिन्नेष्वपीति॥ अयमर्थः सच्छेदानामपिरूपाणांवर्णानांवायोगार्थंधनर्णवच्चात्रयोगेतरेवाप्रानेयोगोतरंनुत्स्यहरांशकानामित्यादिनायोगोन्तरंवाविधेयमिति॥ एवंभिन्नव्यवकलनादिष्वपिबोध्यं॥ यद्यपिव्यवकलनादीनांसंकलनोपजीवकत्वात्तत्प्राथम्येनसंकलननिरूपणंयुक्तं॥ नतथागुणप्राथम्येनव्यवकलननिरूपणंयुक्तंउपजीव्योपजीवकभावाभावात्॥ तथापिधनर्णनाव्यत्यासमात्रविलक्षणस्यव्यवकलनस्यगुणनापेक्षयासंकलनानंतरंगत्वात्॥ खंडगुणनेरूपोनयुतेनगुणे ननिघ्नइत्यपजातिकोत्तरार्धेनाह॥ संशोध्यमानंस्वमृणत्वमेतीति॥ ३॥ संशोध्यतेअपनीयतेतत्संशोध्यमानंरूपंवर्णःकरणीवेतित्रिलिंगसामान्यंनपुंसकलिंगं॥ नचधिधनमस्तितर्हिऋणत्वमेतियदिक्षयोस्तितर्हिधनत्वमेतिं॥ पश्चात्तत्रुटितरुक्तवज्ज्ञेयं॥ एतदुक्तंभवति॥ ययोरंतरंविधेयंतयोर्मध्येसंशोध्यमानस्यधनर्णनाव्यत्यासंकृत्वायोगयुतिःस्यादित्यादिनातयोर्युतिः कर्तव्यातदेवव्यवकलनफलंभवतीत्यर्थः॥ अत्रोपपत्तिः॥ ऋणत्वमिहत्रिधावदस्ति॥ देशतःकालतोवस्तुतश्चेति॥ तद्भवेपरीत्यमेव॥ यतउक्तमाचार्यैर्लीलावत्यांक्षेत्रव्यवहारे॥ दशसप्त

दशाप्रमोभुजौदृश्यस्मिन्नुदाहरणे॥ऋणगताआबाधादिग्वेपरीत्येनेत्यर्थदृति॥तत्रैकरेरवास्थितादृतीयादिग्वि
परीतदिगित्यच्यते॥यथापूर्वविपरीतापश्चिमादिक्॥यथाउत्तरदिग्विपरीतादक्षिणादिगित्यादि॥तथाचपूर्वो
परदेशयोमध्येएकतरस्यधनत्वेकल्पितेतंप्रतिनदितरस्यऋणत्वं॥यथापूर्वगतेधनत्वकल्पनेयदाग्रहःपश्चि
मगतिर्भवतितदाग्रहेगतितुल्याःकलाःकाणंभवंति॥यथावापश्चिमभ्रमस्यधनत्वेयावद्भूहःपूर्वतोगछतिता
वत्पश्चिमभ्रमेऋणमिति॥दक्षिणोत्तरदिशादिष्वपिएवमेववर्णत्वंबोध्यं॥एवंपूर्वोत्तरकालयोरप्यन्योन्यम्
णत्वं॥वारयवत्यादिष्वपिप्रसिद्धं॥एवंतस्मिन्वस्तुनियस्यस्वस्वामिभावसंबंधःतस्यतद्धनमितिव्यवहिय
तेनतस्मिन्वैपरीत्येतुपरस्परस्वस्वामिभावःसंबंधअतोदेवदत्तस्वामिकेधनेयावतियज्ञदत्तस्वामिकत्वेताव
द्देवदत्तस्यर्णमितिव्यवहियते॥तत्रपूर्वदेशास्यधनत्वंपश्चिमदेशास्यचऋणत्वंप्रकल्प्यापपत्तिरुच्यते॥सायथा॥
श्रीविश्वेशः॥तुःशोभोरानंदकाननात्पुरंदरदिशिपंचदशक्रयोजनेषुस्वर्गतरंगिणी तीरविलासिवरीवर्तिक
लेकंपत्तनंवरुणदिशिचाष्टयोजनेषुरंदीवरदलश्यामलपतंगतनयातरंगचुंबिभिःशारद्यद्रिकाधवलैःसु
रनदीलोलकल्लोलैःस्मृतहरिहरमूर्तिरानंदलहरीरनुभवन्जागर्तितीर्थराजःप्रयागः॥तयोस्त्वावचस
कलजनव्यवहारासिद्धमस्तित्रयोविंशतियोजनात्मकमंतरंतच्चयोगंविनानोपपद्यते॥अतोविजातीययो
रंतरेसाध्येयोगःसाध्यः॥परंसयोगःपश्चिमःपूर्वोवातत्रपतनात्प्रयागःकस्यांदिशीतिविचारेतावदानंद
काननात्प्रयागपर्यंतमष्टयोजनात्मकोदेशोयथापश्चिमस्तथापत्तनादपिपश्चिमोभवतिकिंत्वानंदकान
नात्पतनपर्यंतंपंचदशयोजनात्मकोयःपूर्वदेशःसभवतिपत्तनात्पश्चिमएकएवंपत्तनात्प्रयागपर्यंतंदेशा
विचारेआनंदवनपर्यंतंपंचदशयोजनात्मकंएकंशकलंततःप्रयागावधिद्वितीयमष्टयोजनात्मकंशकल ॥९॥

दूयस्यपश्चिमत्वात्त्रयोविंशतियोजनात्मकःपश्चिमदेशःएवंप्रयागात्पतनंकस्यांदिशीतिविचारेप्रयागादानं
दवनपर्यंतंदेशाकालविपरीतदिकंभवति॥तस्माद्यस्मादंतरंसाध्यतेतदवधिशकलंविपरीतदिकंभवतीत्यतउ
क्तंसंशोध्यमानंस्वमृणत्वमेतिस्वत्वंक्षयइति॥एवंधनर्णयोरंतरेप्रतिपादिते॥एवंधनयोरपि॥तद्यथा॥एकःकि
लकाशीतःपूर्वदिग्भागेदशयोजनानिगतःइतरोपितस्मिन्नेवभागेसप्तयोजनानिगतःस्तयोश्चांतरंयोजनत्रयं
सर्वजनप्रसिद्धं॥तच्चदशयोजनात्पश्चिमंसप्तयोजनात्पूर्वंदूरमपिप्रथमावधिभूतस्यस्वंस्वव्यत्यासेकृतेधन
णयोरंतरमेवयोगइतियोगेचकृतेसिद्ध्यति॥एवमृणयोरपिबोध्यं॥अतउपपन्नंसंशोध्यमानंस्वमृणत्वमेतिस्व
त्वंक्षयस्तद्युक्तमुक्तवच्चेति॥अन्यदपिसुधीभिरूहनीयंअत्रोदाहरणेचतुष्टयमुपजातिकार्धेनाह॥त्रयादूयात्
स्वात्स्वमृणादृणंचव्यस्तंचसंशोध्यवदाशुशेषं॥स्वात्त्रयात्स्वंदूयंमित्येकंऋणात्त्रयादृणंदूयंद्वितीयमित्युदाह
रणं॥व्यस्तंचस्वात्त्रयात्ऋणंदूयंमित्येकंऋणात्त्रयात्स्वंदूयंइतिद्वितीयमितिद्वितीयमेवंचत्वार्युदाहरणानि॥
तत्रप्रथमोन्यासः३।२संशोध्यमानंस्वमृणत्वमेतीतिज्ञातं३।२अनयोर्युक्तिरुक्तवत्॥धनर्णयोरंतरमेवयोगइति
ज्ञातं१द्वितीयेन्यासः३।२ज्ञातमुक्तवत्अंतरं१तृतीयेन्यासः३।२संशोध्यमानंक्षयःस्वत्वमेतीत्यर्थः पूर्वपश्चि
मदेशत्वेनयोज्यतेपू३प२संशोध्यमानःपूर्वदेशःपश्चिमदेशोभवतीतिज्ञातंपू३प२अनयोर्धनर्णयोरंतरमे
वयोगइतिशेषंअंतरंपू१अत्रैकस्मादवधेःपूर्वतोयोजनद्वयेनत्रयेणचनरोतिष्ठतःअत्रयोजनद्वयगतात्पु सो
योजनत्रयगोयोजनमेकंपूर्वतस्तिष्ठतीत्यर्थः॥अत्रोदाहरणेषुद्वयस्यशोध्यतोक्तःयोजनद्वयगतत्वादंत
रंज्ञातव्यं॥अथद्वितीयेप२प२उक्तवदंतरेज्ञातंप१पश्चिमतोयोजनत्रयगतःपश्चिमतोयोजनद्वयगतादेके
नयोजनेनपश्चिमतस्तिष्ठतीत्यर्थः॥तृतीयेन्यासःपू३प२उक्तवदंतरेज्ञातंपू५पश्चिमतोयोजनद्वयगता

त्पुंसः पूर्वतोयोजनत्रयगः पंचभिर्योजनैः पश्चिमतस्तिष्ठत्यर्थः॥अथभागहारादीनांगुणनोपजीवकत्वात् भु
जंगप्रयातपूर्वार्धरूपेणगुणनमाह॥स्वयोरस्वयोरिति॥स्वयोरस्वयोर्वधोगुणनंएकस्यापरतुल्यआवृत्ति
रितियावत्॥धनंभवति॥स्वर्णघातेक्षयोभवतिएतदुक्तंभवतियदागुण्योगुणकश्चेतिद्वावपिधनमृणंवाभव
तस्तदातदुक्तंगुणनफलंधनंभवतियदात्वेकतरंधनमृणमितरत्तदातदुक्तंगुणनफलंऋणंभवतीति॥अत्र
गुणनफलस्यधनर्णत्वमात्रंप्रतिपादितं॥अंकनस्तुव्यक्तोक्ताःसर्वेपिगुणनप्रकाराद्रष्टव्याः॥अथगुणनोदाह
रणत्रयमुपजातीकोत्तरार्धेनाह॥धनंधनेति॥स्पष्टोर्थः॥ऋणंधनेनेतिचतुर्थमुदाहरणंद्रष्टव्यं अत्रगुणकः२
गुण्यः२ अथप्रथमेन्यासः२।२ उक्तवज्ज्ञातंगुणनफलंधनं४ द्वितीयेन्यासः२।४ अस्वयोर्वधःस्वमितिज्ञा
तं४ तृतीयेन्यासः२।२ स्वर्णघातेक्षयइतिज्ञातं४ चतुर्थेन्यासः२।४ स्वर्णघातेक्षयइति४ गुण्येनह
तेगुणेचतदेवेतिचूर्णिकयागुण्यत्वगुणकत्वयोःकोभवारःप्रदर्शितिः॥ननुस्वयोर्वधःस्वभवितुमर्हतिस
ज्ञातीयत्वातद्दृष्टचरत्वाच्चपरमृणयोर्वधःकथंधनंभवितुमर्हतिविजातीयत्वात्॥एवंस्वर्णघातेपिक्षयः
कथंभवतुनवविजातीयत्वाद्विनिवार्य॥वैपरीत्यस्यास्रष्टचत्वात्॥धनमेवकथंनस्यादविनिगमनाविरहात्॥अ
त्रोच्यते॥गुण्यस्यगुणकतुल्यावृत्तिर्गुणनफलमिति तावत्प्रसिद्धं॥तत्रगुणकोद्विविधः॥धनमृणंचेति॥
तत्रधनकेसतिधनस्यऋणस्यवागुण्यस्यआवर्तनैःक्रियमाणेऋणेधनमृणंचगुणनफलंस्यात्॥अतःस्वयो
र्वधःस्वगुणकस्यधनत्वेगुण्यस्यर्णत्वेतृणमितिसिद्धं॥अथर्णगुणकेविचारः॥तत्रर्णत्वंवैपरीत्येप्रागेवप्रतिपा
दितं॥तथाचऋणगुणकोनामविपरीतगुणकः॥गुण्यस्यविपरीतावर्तनकारइतियावत्॥तथासतिधनेगुण्ये
गुणनफलंमृणं॥ऋणेगुण्येगुणफलंधनमितिप्रसिद्धं॥अत्रअंतिमपक्षेअस्वयोर्वधःस्वमित्यपन्नं॥मध्य

॥६॥

मपक्षयोस्तगुण्यगुणकयोरेकतरस्यधनत्वेन्यस्यऋणत्वेफलमृणंउपपद्यतेइतिस्वर्णघातेक्षयइत्यक्तं॥यद्वाग
णितेनोपपत्तिःप्रदर्शिता॥धनगुणनेतावदविवादएव॥ऋणगुणनेतुविचारः॥अस्तितावदिदंरूपप्रसिद्धं॥गु
ण्योगुणकखंडाभ्यांपृथग्गुणितःसहितश्चगुणनफलंभवतीति॥यथागुण्यः३६ गुणकः१२ अस्यखंडद्वयं ४॥
एकमिष्टोनोगच्छशरपरंच॥खंडाभ्यांपृथग्गुणितोगुण्यः९४०।१०८० योगेजातं १६२० एवमेवकल्पितमि
ष्टं ४ एतद्दलराशिः१२ द्वितीयंखंडं १६ अत्रापिपृथक्खंडद्वयगुणितेनसहितेनतेनगुण्येनगुणनफलेनभवि
तव्यं॥तत्रखंडाभ्यां ४।१६ पृथक्गुणितोगुण्यः ६४०।२१६० अनयोर्योगेगुणनफलंनोपपद्यतेगुणफल
स्यानुपपत्त्यास्वर्णघातेक्षयोभवतीति अवगम्यते॥ततस्तथाकृते ६४७।२९५० धनर्णयोरंतरमेवयोगइति
१६२० गुणनफलमुपपद्यते॥अतउक्तं स्वर्णघातेक्षयइतिएवंगुण्यखंडेप्रत्येकंगुणकखंडगुणितेसहितेचगुणन
फलंभवति॥तद्यथागुण्यः३६ तस्यखंडद्वयं १२।२४ गुणकस्यापिखंडद्वयं ४।८ गुणकखंडाभ्यांप्रत्येकंगुणितं
गुण्यपूर्वखंडं १२ ज्ञातं ४२।१०४० एवप्रत्येकंगुणितंद्वितीयखंडं २४ ज्ञातं २०।४० सर्वेषांयोगे ज्ञातंगुणनफलं
१६२० एवमेवकृतेसमीष्टंखंडद्वयं गुण्यस्य १४।२४ गुणकस्यापि १६।४ अत्रापिगुणखंडाभ्यांप्रत्येकंगुणितंगु
ण्यपूर्वखंडं १४० ज्ञातं २२४०।५६० अनयोर्योगः १६८० एवमेवद्वितीयमपि५ गुणकखंडाभ्यांपृथग्गुणितं८०।
२० अत्रर्णगुणितमृणंसज्ञातीयत्वात्तृणमेवेतिकृतेगुणनफलंनोपपद्यते १९८० इति॥गुणनादन्यथानुपपत्या
ऋणगुणितंधनंभवतीत्यवगम्यतेयतस्तथाकृते ८०।२० गुणनफलं १६ २० उपपद्यतइति॥अतउक्तमस्व
योर्वधःस्वमिति॥एवबुद्धिमद्भिरन्यदप्यूह्यं॥ननुवर्गस्यसमद्विघातरूपतयागुणोत्तरंगत्वाद्भजनान
पेक्षत्वाच्च॥प्रथमतोनिरूपणंयुक्तं॥नचभक्तोगुणःभ्रुधतीत्यादिनागुणनप्रकारेणवर्गकरणेभजनस्यो

पुंसः पूर्वतो योऽजनत्रयगः पंचभिर्योजनैः पश्चिमतस्तिष्ठत्यर्थः॥अथभागहारादीनां गुणनोपजीवकत्वात् भु
जंगप्रयातपूर्वार्धखंडेनगुणनमाह॥स्वयोरस्वयोरिति॥स्वयोरस्वयोर्वधोगुणनं एकस्यापरतुल्यभावनि
रितियावत्॥धनंभवति॥स्वर्णघातेक्षयोभवतिएतदुक्तंभवतियदागुण्योगुणकश्चेतिद्वावपिधनमृणंवाभव
तस्तदातदुक्तंगुणनफलंधनंभवतियदात्वेकतरंधनमृणमितरत्तदातदुक्तंगुणनफलंऋणंभवतीति॥अत्र
गुणनफलस्यधनर्णत्वमात्रंप्रतिपादितं॥अंकतस्तुव्यक्तोक्ताःसर्वेपिगुणनप्रकाराद्रष्टव्याः॥अथगुणनोदाह
रणत्रयमुपजातीकोत्तरार्धेनाह॥धनंधनेनेति॥स्पष्टोर्थः॥ऋणंधनेनेतिचतुर्थमुदाहरणंद्रष्टव्यं॥अत्रगुणकः२
गुण्यः२अभप्रथमेन्यासः२।२ उक्तवज्जातंगुणनफलं धनं ४ द्वितीयेन्यासः २।२ अस्वयोर्वधः स्वमिति ज्ञा
तं ४ तृतीयेन्यासः २।२ स्वर्णघातेक्षयइतिज्ञातं ४ चतुर्थेन्यासः २।२ स्वर्णघातेक्षयइति ४ गुण्येनह
तेगुणेचतदेवेतिचूर्णिकयागुण्यत्वगुणकत्वयोः कामचारःप्रदर्शितः॥ननुस्वयोर्वधः स्वभावितुमर्हतिस
ज्जातीयत्वाद्दृष्टचरत्वाच्चपरमृणयोर्वधः कथंधनंभवितुमर्हतिविजातीयत्वात्॥एवंस्वर्णघातेपिक्षयः
कथंभवतुनवविजातीयत्वाद्दृष्टचरत्वाद्वेतिवाच्ये॥वैपरीत्यस्याकृतत्वात्॥धनमेवकथंनस्यादविनिगमनाविरहात्॥अ
त्रोच्यते॥गुण्यस्यगुणकतुल्यभावहेतुर्गुणनफलमिति तावत्प्रसिद्धं॥तत्रगुणकोद्विविधः॥धनमृणंचेति॥
तत्रधनकेसतिधनस्यऋणस्यवागुण्यस्यआवर्तनैःक्रियमाणेऋणेधनमृणंचगुणनफलं स्यात्॥अतःस्वयो
र्वधःस्वगुणकस्यधनत्वेगुण्यस्यर्णत्वेतृणमितिसिद्धं॥अथर्णगुणकेविचारः॥तत्रर्णत्वंवैपरीत्येप्रागेवप्रतिपा
दितं॥तथाचऋणगुणकोनामविपरीतगुणकः॥गुण्यस्यविपरीतावर्तनकारइतियावत्॥तथासतिधनेगुण्ये
गुणनफलंमृणं॥ऋणेगुण्येगुणकेधनमितिप्रसिद्धं॥अत्रभंतिमपक्षेअस्वयोर्वधःस्वमित्यपन्नं॥मध्य

॥६॥

मपक्षयोस्तगुण्यगुणकयोरेकतरस्यधनत्वेन्यस्यऋणत्वेफलमृणंउत्पद्यतेइतिस्वर्णघातेक्षयइत्युक्तं॥यद्वागु
णितेनोपपत्तिःप्रदर्शिता॥धनगुणनेनावदविवादएव॥ऋणगुणनेतुविचारः॥अस्तितावदिदंसूत्रप्रसिद्धं॥गु
ण्योगुणकखंडाभ्योपृथग्गुणितःसहितश्चगुणनफलंभवतीति॥यथागुण्यः१३९ गुणका १२ अस्यखंडद्वयं ४॥
एकमिष्टमिष्टोनोराशिरपरंच॥खंडाभ्यांपृथग्गुणितोगुण्यः९४०।१०८० योगेजातं १६२० एवमेवकल्प्यतामि
ष्टं ६ एतदूनोराशिः १२ द्वितीयंखंडं १६ अत्रापिपृथक्कृखंडद्वयगुणितेनसहितेनगुण्येनगुणनफलेनभवि
तव्यं॥तत्रखंडाभ्यां ६।१६ पृथक्गुणितोगुण्यः ६४०।२१६० अनयोर्योगेगुणनफलंनोपपद्यतेगुणफल
स्यानुपपत्यास्वर्णघातेक्षयोभवतिइतिअवगम्यते॥ततस्तथाकृते ९४७।२९५० धनर्णयोरंतरमेवयोगइति
१६२० गुणनफलमुत्पद्यते॥अतउक्तं स्वर्णघातेक्षयइतिएवंगुण्यखंडेप्रत्येकंगुणखंडगुणितेसहितेचगुणन
फलंभवति॥तद्यथागुण्यः १३९ तस्यखंडद्वयं १३०।९ गुणकस्यापिखंडद्वयं ४।८ गुणकखंडाभ्यांप्रत्येकंगुणिते
गुण्यपूर्वखंडं १३० जातं ५२०।१०४० एवंप्रत्येकंगुणितंद्वितीयखंडं ९ जातं २०।४० सर्वेषांयोगेजातंगुणनफलं
१६२० एवमेवकृतेमभीष्टंखंडद्वयंगुण्यस्य १४०।९ गुणकस्यापि १६।८ अत्रापिगुणखंडाभ्यांप्रत्येकंगुणितंगु
ण्यपूर्वखंडं १४० जातं २२४०।५६० अनयोर्योगः १६८० एवमेवद्वितीयमपिऽ गुणकखंडाभ्यांपृथग्गुणितं८०।
२० अत्रर्णगुणितमृणंसजातीयत्वात्धनमेवेतिकृतेगुणनफलंनोपपद्यते १९८० इति॥गुणनादन्यथानुपपत्या
ऋणगुणितंधनंभवतीत्यवगम्यतेयतस्तथाकृते ८०।२० गुणनफलं १६२० उपपद्यतइति॥अतउक्तमस्व
योर्वधःस्वमिति॥एवबुद्धिमद्भिरन्यदप्यूह्यं॥ननुवर्गस्यसमद्विघातरूपतयागुणनोतरंगत्वाद्भजनान
पेक्षत्वाच्च॥प्रथमतोनिरूपणंयुक्तं॥नचभक्तोगुणःश्रुतीत्यादिनागुणनप्रकारेणवर्गकरणेभजनस्यो

पजीव्यतया तस्य प्राथम्येन निरूपणयुक्तमिति वाच्यं ॥ गुणनादपि पूर्वं तन्निरूपणप्रसंगादिति चेत् ॥ न। व
र्गीकरणप्र।कारेण अति विलक्षणतया वर्गस्य प्रतिबहिरंगत्वात् ॥ प्रत्यक्षतवर्गप्रतिपदस्यैव गुणनप्रतिभज न
स्यैवांतरंगत्वात् वर्गप्रतिउपजीव्यत्वाच्च प्रथमतस्तन्निरूपणस्यैवावश्यकत्वात् कस्यचित् गुणनप्रकारस्य भ
जनसापेक्षत्वेपि भजननिरपेक्षतयापि गुणस्यसिध्यत्वात् भजनस्यतु सर्वथापि गुणनसापेक्षत्वात् गुणनानं
तरमेवतन्निरूपणं युक्तमिति भुजंगप्रयातपूर्वार्धस्यशेषशकलेनतदाह ॥ भागहारेपिचैवं निरुक्तमिति ॥
भागहारेपि गुणनवत् एवं निरूक्तमित्यर्थः ॥ एतदुक्तं भवति ॥ भाज्यभाजकयोरुभयोरपि धनत्वेऋणत्वेवात
ब्धिर्धनमेव ॥ यदा त्वेकतरस्य धनत्वमृणत्वमितरस्यतदालब्धमृणमेवेति ॥ अत्रात्योक्तो भागहार प्रकारो
व्यक्तोक्तोज्ञेयः ॥ अत्रोदाहरणचतुष्टयमुपजातिकयाह ॥ रूपाष्टकं रूपचतुष्टयेनेति ॥ स्पष्टोर्थः । प्रथमेन्यास
ः स्वयोर्भागहारः स्वमिति जातालब्धिर्धनं २ द्वितीयेन्यासः अस्वयोर्भागहारः स्वमिति जातालब्धिर्ध न
मेव २ तृतीयेन्यासः स्वणभागहारेक्षयइति जातालब्धिः ऋणं २ चतुर्थेन्यासः स्वर्णभागहारेक्षयइति जा
तालब्धिः ऋणं २ ॥ अत्रोपपत्तिः भाज्याधरः शुध्यति यद्गुणः स्यादेत्यात्फलं तरवलु भागहारेत्यत्फलात्यस्मि
न्फलेहरगुणितेभाज्यादुपनीतेशुध्यतिर्भवतीतिधनद्वयेलब्धिः २ द्वितीयेपि धनद्वयेनहरेस्मिन् गुणितेन
भाज्यादस्मादपनीतेसंशोध्यमानंक्षयः स्वत्वमिति धनर्णयोरंतरमेव योगइतिचकृतेशुध्यतिर्भवतीतिद्वयं धन
मेवलब्धिः २ एवंसिध्यंस्वयोरस्वयोर्वाभागहारेस्वमिति ॥ तृतीयेतु धनद्वयेनहरे गुणिते भाज्याद
स्मापनीतेसंशोध्यमानंस्वमृणत्वमेतीतिऋणद्वयंलब्धिः २ एवंचतुर्थेपि ऋणगुणितएवहरः शुध्यती
तिऋणमेवलब्धिरितिसिध्यं ॥ स्वर्णभागहारेक्षयइति ॥ अतउक्तं भागहारेपिचैवं निरूक्तमिति ॥ सर्ववर्गे ॥७॥

पयुक्तमुक्तावर्गेतन्मूलंच भुजंगप्रयातोत्तरार्धेनाह ॥ कृतिः स्वर्णयोः स्वंस्वमूले धनर्णेनमूलंक्षयस्यास्ति न
स्याकृतित्वात् ॥ ४ ॥ स्वस्यऋणस्यवावर्गः स्वंभवतिअंकनस्तुवर्गप्रकाराव्यक्तोक्त्यासर्वेपिदृष्टव्याः ॥ अथमू
लमाह ॥ स्वमूलेधनर्णेइति ॥ स्वस्यधनस्यमूलेधनर्णेस्यातां ॥ धनस्यैववर्गस्यऋणमपिमूलंभवतीत्यर्थः ॥ अ
थात्रविशेषमाह ॥ नमूलंक्षयस्यास्तीति ॥ तत्रहेतुमाह ॥ तस्याकृतित्वादिति ॥ वर्गस्यमूलंलभ्यतेऋणंकस्तु
नवर्गः कथमतस्तस्यमूलंलभ्यते ॥ ननुऋणंकः कुतोवर्गोनभवतिनहिराजनिदेशाः किंचयदिनवर्गः तर्हित
स्यवर्गत्वंनिषेत्स्यमपिअनुचितंप्रथमोक्तेः ॥ सत्यं ॥ ऋणंकंवर्गवदता भवताकस्यसवर्गइतिवक्तव्ये ॥ नतावत्थ
नांकस्यसमद्विघातोहिवर्गः तत्रधनांकेगुणितेयोवर्गोभवेत्सधनमेव ॥ स्वयोर्वधः स्वमित्युक्तत्वात् ॥ नाप्य
णांकस्य ॥ तत्रापिसमद्विघातार्थमृणांकेनऋणांकेगुणितेधनमेववर्गोभवेत् ॥ अस्वयोर्वधः स्वमित्युक्तत्वात्
एवंसतिकमपितमंकंनपश्यामोयस्यवर्गः क्षयोभवेत् ॥ नचाप्रस्तुतः किंअंकसादृश्याद्भवंतीवर्गत्वस्यप्रस
क्तिः ॥ वर्गयुक्तिस्तुगुणनयुक्तिरेव ॥ मूलेतुव्यस्तविधिरेवोपपत्तिः ॥ अथवर्गोदाहरणद्वयमुपजातिकापूर्वार्धे
नाह ॥ धनस्यरूपत्रितयस्यवर्गंक्षयस्यचब्रूहिसरवेममाशु ॥ स्पष्टोर्थः ॥ प्रथमेन्यासः ३ जातोवर्गः ९ द्वितीये
न्यासः ३ जातोवर्गः ९ स्वमेवकृतिः स्वर्णयोः स्वमित्युक्तत्वात् ॥ अथोत्तरार्धेनमूलोदाहरणद्वयमाह ॥ धना
त्मकानामधनात्मकानांमूलंनवानांवएषग्वदाशु ॥ अतिरोहितार्थं ॥ न्यासः ९ जातंमूलं ३ वा ३ स्वमूलेध
नर्णेइत्युक्तत्वात् ॥ द्वितीयेन्यासः ९ एषोऽवर्गत्वान्मूलेनास्ति ॥ घनेघनपदेवानकश्चिद्धनर्णत्वकृतोवि
शेषः किंतुसजातीयत्वमेवेति ॥ नात्रतन्निरूपणमितिध्येयं ॥ दैवज्ञवर्यगणसेवतसेवणश्चबल्लाळसंज्ञ
गणकात्मजनिर्मितेस्मिन् ॥ बीजक्रियाविकृतिकल्पलतावतारेस्वर्णोद्भवाः समभवन्नितिषड्प्रकारः ॥ १ ॥

इतिश्रीसकलगणकसार्वभौमश्रीबल्लाळदैवज्ञसूनुकृष्णगणकविरचितेबीजविवृतिकर्ममूलनावतारेधन
र्णषड्विधप्रकारणं॥अत्रश्लोकाः३१०॥ ॥अथयथारूपवर्णादिषड्विधायुक्तयाधनर्णषड्विधस्यप्रथ
मतोनिरूपणंयुक्तंतथारूपषड्विधस्यापितद्युक्तं॥तद्ययप्यव्यक्तोक्तशून्यपरिकर्माष्टकेनात्रधनर्णषड्वि
धेस्यनचगतार्थमितिनारंभणीयंतथापियद्यत्रनारभ्यतेनहिव्यक्तोक्तशून्यपरिकर्ममार्गेणेवशून्यगणि
तंक्रियतेननुधनर्णकृतोविशेषोनवधानाद्भ्रमाद्दूनितन्निरासार्थमिहतदारंभणंयुक्तमेव॥ननुखेहिशून्यं
मभावइतियावत्॥तस्यसंकलनादिषड्विधंनसंभवति॥संकलनादिफलस्यसंख्याधर्मत्वात्॥नचसंख्यायाः
शून्येनसहसंकलनाद्येकर्तव्येमाभूच्छून्येसंकलनादिफलंकिंतुसंख्यायामेवतदस्तीतिवाच्यं॥एवम
पिखचतुर्विधमेवसंभवेन्नखषड्विधंवर्गमूलयोस्तदसंभवात्॥वस्तुतस्तुद्वितीयसंख्यायाअपिअभावा
त्॥संकलनादेरपिअसंभवएव॥तस्यसंख्याद्वयसाध्यत्वादिति॥अत्रोच्यते॥अस्त्येवशून्यस्यापिसंकल
नादिसंभवः॥नचद्वितीयसंख्यायाअभावात्तदसंभवइतिवाच्यं॥शून्यसंकलनादावपिद्वितीयसंख्यायाः
सत्वात्॥तद्यथा॥पंचोत्तरशतस्य १०५ विंशत्यायोगेकर्तव्येसतिययास्थानेकार्यः॥तत्रैकस्यांसंख्यायांदश
कस्थानेशून्यमेकस्थानेपंच॥इतरस्यांदशकस्थानेद्वयमेकस्थानेशून्यमिति॥अस्त्यत्रशून्यसंकलनेपि
संख्याद्वयं॥एवंशून्यवर्गादिष्वपिज्ञेयं॥एवंस्थाप्योत्थवर्गइ यादिनावर्गकरणे॥स्थाप्योघनोवास्य
ततोत्थवर्गइत्यादिनाकरणेचशून्यवर्गघनयोरपिसंभवोद्रष्टव्यः॥ननुशून्यंकिंसंख्यानगतंनभावोवे
तिव्युत्पादयंत्याचार्याः॥अस्तितेजिज्ञासायदितच्छून्यतासाविशेषमिदंसंख्याव्युत्पादनं॥तथाहि॥इहहिस
कलचराचरनिर्माताभगवान्परमकारुणिकःस्वयंभूस्तत्क्रमविशेषविशिष्टवर्णमयानिशास्त्राणिस्व

॥८॥

३८१
११८८

ष्टाथात्ममेधसांनदुरुपस्थितयेमेधाविनांतुनदुरुपस्थितिलाघवावसातिविस्मरणेऽन्यनिरपेक्षतःस्मरणायचश्रुत
परंपरांथानगमाच्चयथावर्णज्ञापकलिपीःससर्जतथासंख्योपस्थितिलाघवज्ञापकानंकान्षघस्सर्जत्॥तत्रप्रतिव
र्णलिपिसर्गेवर्णानामियत्तयातत्रज्ञापकलिपिष्वपिसास्तीतिलिपिषुसंकितग्रहःसुशकः॥इहतुप्रतिसंख्यमेकस
र्जेसंख्यानामानंत्यात्तत्रज्ञापकेषुवर्षशतेनाप्यशक्यःसंकेतग्रहः॥तथाहि॥इहकुशाग्रबुद्धेरपिप्रतिदिनंय
थाकथंचिच्छतपर्यंतमपिसंकेतग्रहेनदेकचित्तयाशतवर्षपर्यंतंअभ्यासेनषट्त्रिंशल्लक्षपर्यंतंसंकेतग्रहःस्या
न्मेधाविनः॥ततुतदधिकसंख्याज्ञापकेषिति॥अतःपरमकारुणिकोभगवानितिचतुरोनवैवांकान्ससर्जयथा
१।२।३।४।५।६।७।८।९ अथवाभीष्टस्थानाद्वाक्रमेणद्वितीयतृतीयादिस्थानान्युत्तरोत्तरंदशगुणानांसंख्यानां
संज्ञाभिर्दशादिभिरसंकेतयत्॥प्रथमस्थानेचैकगुणसंख्यास्थानत्वात्॥एकसंज्ञयायथासतिनवांकास्त
त्रस्थानसंबंधात्स्थानानिचाततस्तदेकसंबंधात्ययास्थानंतांसंख्यांज्ञापयेषुरिति सकलसंख्यावगमसुग
मइति॥यथाभीष्टस्थानेनिवेशितोयमेकः ४ एकगुणायास्त्रिंशत्संख्यायाः ज्ञापकोभवति॥ततोवामतो द्वि
तीयस्थानेनिवेशितः स्वसंख्यायाः दशकज्ञापकोभवति॥यथादशकद्वयज्ञापकोयं २३ एवंवामतस्तृती
यचतुर्थपंचमादिस्थाननिवेशितोंकः उत्तरोत्तरं दशगुणांशतसहस्रायुतादींयथास्वं ज्ञापकोभवति॥तत्रा
भीष्टसंख्यायायथास्वंभवमेकदशकशताद्यभावेतत्स्थानपूरणार्थंअभावद्योतकः शून्यसंज्ञकोलिपि
विशेषोनिवेश्यतेयथाअष्टोत्तरसंख्यायांदशकाभावात् द्वितीयस्थानेशून्यंनिवेशितं १०८ यथावाअष्टोत्तर
सहस्रसंख्यायांदशकशतकयोरभावात् द्वितीयतृतीयस्थानयोस्तत् १००८ अन्यथोद्दिष्टसंख्ययोरेवाष्ट
कसहस्रांकयोरेववानिवेशो १८ द्वितीयस्थाननिवेशितस्य दशकज्ञापकत्वात् अष्टादशत्वंप्रतीयेतनाभीष्टसं

रव्याया अनएवात्रायुतलक्षादीनामभावे नेतत्स्थाने शून्यंनिवेश्यते ॥ तेन विनाप्यभीष्टंसंख्याज्ञापकस्थानपूरणात् ॥ अतोभीष्टसंख्यायामुत्तराधिभूतोकस्थानाद्दक्षिणस्थानानांपूरकत्वात् तत्रोक्तरीत्याशून्यंनिवेशनमावश्यकं ॥ वामस्थानानांचपूरकत्वादानंन्याच्चनतथेति ॥ नन्वस्तिलिपिषुसव्यक्रमः स्त्रीष्टसंज्ञोनांकलिप्यादावादरणीयश्चेति ॥ तत्कथंनमपहायसव्यक्रमआदृतइतिचेत् ॥ न ॥ शतसहस्रायुतलक्षादिसंख्यायाउत्तरोत्तरमभ्यर्हितत्वात् तत्सव्यक्रमस्येवोचितत्वादेतक्रमेणैवद्वितीयादिस्थानानांसंज्ञास्त्विति वाच्यंउत्तरावधेरभावात् ॥ परिच्छिन्नसंख्यासत्तत्सत्वेपितस्यानियतत्वात् ॥ प्रथमावधेस्तुनियतत्वात्तत्स्थानमारभ्यस्थानसंज्ञायुक्ततरेत्यळं पल्लवितेन ॥ तदेवशून्यस्याभावत्वेपितत्संकळनादेर्नसंख्याद्वयसाध्यत्वहानिः ॥ नहिद्वितीयसंख्यायाउभयोर्वासंख्ययोर्दशकाद्यभावमात्रेणसर्वथातदभावइति ॥ वस्तुतस्तुसंख्यायादशकाद्यभावेसर्वथाप्यभावनात्यभावमात्रेयत्नःस्वर्णद्विधंनतत्स्वर्णद्विधमित्युच्यते ॥ अप्यनंतस्यस्वहररारेःस्वमूळस्यचाभावात् ॥ ननुद्वितीयेसंख्यायाःसर्वथाप्यभावेकथंसंकळनादिसंभवःनस्यसंख्याद्वयसाध्यत्वात् ॥ इत्युक्तमेवेतिचेन्न ॥ स्वसंकळनादेरनथात्वात् ॥ ययोःसंकळनादिनायस्यसंख्याभवतितयोरन्यतरस्योभयोर्वा भावेतस्यसंख्यायाःसंख्याभावस्यवासंस्वळनादिफळत्वात् ॥ यथाशरक्रोतिसंख्ययोर्यथासंभवसंकळनेनव्यवकळनेनवास्फुटक्रोतिसंख्याभवतीतितयोरन्यतरस्योभयोर्वा भावेस्फुटक्रोतेःसंख्यायास्तदभावस्यवायथास्वस्वसंकळनव्यवकळनफळत्वं ॥ एवंस्वगुणनादिष्वपिवाध्यं ॥ नचवस्तुतःस्वर्णद्विधाभावेकिमनेनपरिभाषानविधीयतेतदाक्रोतिशरयोःसत्वेनयोरेकभिन्नादिक्रेतृसंख्यासंकळनव्यवकळनाभ्यांस्फुटक्रोतिसंख्याभवति ॥ एकतरस्यैवसत्वेतत्संख्यातुतस्याःस्फुटक्रोतिसंख्याभवतिद्वयोरभावेस्फुटक्रोत्यभावइतिवक्तव्यंस्यात् ॥ एवंप्रतिपदंसाधकःसंख्यायाःअभावेसाध्यसंख्या ॥९॥

याःसाधनार्थंपृथग्वचनावश्यकतयाग्रंथगौरवंस्यात् ॥ स्वर्णद्विधपरिभाषायांतुएकभिन्नादिक्रेतृक्रोतिशरयोःसंख्यासंकळनव्यवकळनाभ्यांस्फुटक्रोतिसंख्याभवतीत्येववक्तव्यंस्यात् ॥ एवंप्रतिपदं ॥ तथासतिग्रंथलाघवंगणितपरिच्छेदश्चस्यादिति दिक् ॥ तदेवंस्वर्णद्विधस्यावश्यकत्वाद्भुजंगप्रयातेननदाह ॥ तत्रपूर्वार्धेनस्वसंकळनव्यवकळनेआह ॥ स्वयोगइति ॥ अस्यायमर्थः ॥ रूपस्यस्यात्तावदादिवर्णस्यकरण्यावाशून्येनसहयोगेवियोगेवाकर्तव्येरूपादिकधनमृणंवानथैवभवेत् ॥ योगवियोगकर्तानकश्चिद्द्वितीयइत्यर्थः ॥ अत्रस्वयोगोद्विविधः ॥ स्वेन योगोरूपादेःस्वयोगइत्येकः स्वस्ययोगोरूपादिनास्वयोगइतिद्वितीयः ॥ एवंवियोगोपिद्विविधः ॥ स्वेनवियोगइतित्येकः स्वाद्वियोगइतिद्वितीयः ॥ तत्रद्विविधेपियोगेपूर्वस्मिन् वयोगेचरूपादिकंधनर्णंवायथास्थितमेव ॥ स्वाद्वियोगेविशेषमाह ॥ व्युतंशून्यमिति ॥ धनमृणंवारूपादिकंशून्यतःशोधितंसत् विपर्यासंवैपरीत्यंप्राप्नोति ॥ धनंचेच्छून्यतश्चुतंऋणंभवतिऋणंचेद्धनंभवतीत्यर्थः ॥ अत्रोदाहरणानिग्रंथगौरवभयात्पूर्वार्धेनाह ॥ रूपत्रयंस्वक्षयंगइति ॥ धनंरूपत्रयंरूपत्रयमृणंस्वंचएतत्त्रयमपिपृथक्पृथक्युक्तंकिंस्यात्तदुद ॥ स्वेनयुक्तंस्वयुक्तंस्वेवियुक्तंस्वयुक्तंइतिउदाहरणमपिदृष्टव्यं ॥ स्वाद्वियोगेउदाहरणमाह ॥ वदस्वव्यक्तमेवेति ॥ अत्रशून्यस्यधनत्वेऋणत्वेवानकश्चिद्द्वितीयइतिनस्यधनर्णत्वंनोद्दिष्टं ॥ न्यासः ३।३।० एतानिस्वेनयुक्तानिस्वेयुक्तानिस्वेनवियुक्तानिचाविकृतान्येव ३।३।० अथस्वाद्वियोगार्थंन्यासः ३।३।० एतानिस्वाच्छोधितानिज्ञातानिविपर्यस्तानि ३।३।० शून्यस्यविपर्ययेणकश्चिद्द्वितीयइतिनकृतः ॥ वस्तुतस्तुस्वस्यधनर्णत्वंनास्त्येवभावत्वात् ॥ नचसंख्यागतंयोजकत्वादिकंयथातदभावेशून्येउपचर्यतेतद्वत्धनर्णमपिउपचर्यतामितिवाच्यं ॥ योजकयोज्यवियोजकवियोज्यगुणकगुण्यभाजकभाज्यवर्गमूलानांफळेविशेषोपलंभात् ॥ तदुपचारस्यव्यर्थत्वादितिदिक् ॥ अथसंकळनव्यवकळनयोरुपपत्तिः ॥ इहयोज्ययोःकयोरुभयोरन्य

तरस्यवा यावानुपचयोपचयोवाभवतितावानेवतत्संकळनेपीतिप्रसिद्धं॥ यथायोज्यः ३ योजकः४ संकळनफळं ७ अथवायोजक।३ संकळनफळं ६ अथवायोजकः २ संकळनफळं ५ योजकः १ फळं ४ एवंयोजकः० योज्यः ३ अत्रयोजकसंख्यायोयावानुपचयस्तावानेवसंकळनफळेप्युपलभ्यते॥ इतियोजकतुल्येयोजकोपचयेसंकळनफळेपियोजकतुल्येवोपचयेनभाव्यं॥ तथासतियोज्यतुल्यमेवसंकळनफळं स्यादितिखेनयोगेभविकृतोराशिः॥ एवंयोज्यापचयवशात् अपिसंकळनफळापचयायोज्यतुल्येयोज्यापचयेसंकळनफळेपियोजकतुल्येतावतैवापचये नभाव्यमितियोजकसंख्यातुल्यमेवसंकळनफळं स्यादितिखस्ययोगेप्यविकृतोराशिः॥ एवमुभयापचयवशेनशून्ययोःसंकळनफळंशून्यमितिद्रष्टव्यं॥ अथवियोज्यसंख्यायोवियोजसंख्यातुल्यः पचये व्यवकळनफळं भवंति॥ तत्रवियोजकसंख्यायोयावानपचयस्तावानेवोपचयोव्यवकळनफळेभवतीतिवियोजकतुल्येवियोजकापचयेसतिव्यवकळनफळेवियोजकतुल्येनोपचयेनभाव्यमितियोज्यसंख्यातुल्यंव्यवकळनफळंस्यादतःखेनवियोगेविकृतोराशिः अथयथायथावियोज्यःपचयोभवतितथातथाव्यवकळनफळेप्यसीतिप्रसिद्धं॥ यथावियोज्यः ९ वियोजकः१ व्यवकळनफळं २ अथवियोज्यः४ व्यवकळनफं १ वियोज्यः३ व्यवकळनफळं० अथवियोज्यः२ यत्रापिव्यवकळनफळेनएकोनेनभाव्यं॥ तथासतिव्यवकळनफळं १ अवियोज्यः १ उक्तवद्व्यवकळनफळं २ अथयोज्यः० उक्तवद्व्यवकळनफळं ३ भाव्यमितिउपपन्नंव्यक्तंशून्यतत्स्तुपर्यासमेतिद्रष्टि॥ एवंयोज्ययोजकयोर्वियोज्यवियोजकयोश्चधनत्वंप्रकल्प्ययथायुक्तिरुक्तातथाउभयोर्ऋणत्वमपिप्रकल्प्यद्रष्टव्याएकस्यधनत्वमितरस्यऋणत्वमितिकल्पनेनूपचयापचययोरन्यथात्वेनोपपत्तिरिष्टयेत्फळेपलूविनेन॥ अथोत्तरार्धेखगुणादिचनुष्टयमाह॥ वधादौवियदिति॥ यथापूर्वंखयोगवियोगयोर्वि

१०

विध्यमुक्तेनथाखगुणनभजनयोरपिद्वैविध्यमस्ति॥ खस्येति॥ खेनेतिवर्गादिषुनुखस्येत्यकएवप्रकारःसंभवतिवर्गादिकरणेद्वितीयसंख्यानपेक्षणात्॥ अत्रखस्येतिप्रत्याहारेणाह॥ वधादौवियत्खस्येति॥ खस्यशून्यस्यवधादौगुणनभजनवर्गनन्मूलादिषुवियत्स्यात्॥ गुणनफळादिकंशून्यंभवेदित्यर्थः॥ खेनेतिगुणनप्रकारेफळमाह॥ खंखेनघानहतिः॥ खेनशून्येनघातेकस्यचिदंकस्यगुणनेगुणनफळंखंस्यात् अत्रखगुणश्चेत्यश्वशेषविधावित्यादिःपाटीस्थोविशेषोद्रष्टव्यः॥ अन्यथात्रिभज्यकोन्मंडुकशंकुघातादित्यादिनायस्यानयनेनगोळसंधीयस्यभावापत्तेरितिदिक्॥ खेनेतिभजनप्रकारेफळमाह॥ खहारोभवेत्खेनभक्तश्चराशिरिति॥ खेनभक्तश्चराशिःखहारोभवेत्॥ खंहारोयस्येतिखहारः॥ अनंतइत्यर्थः॥ उदाहरेणावसरेवक्ष्यतिच॥ अयमनंतोराशिःखहरउच्यतइति॥ अत्रोपपत्तिः॥ गुण्यस्यापचयवशात्गुणनफळस्यापचयइतितावत्प्रसिद्धं॥ यथागुणकः१२ गुण्यः४ गुणनफळं४८ अथवागुण्यः३ गुणनफळं ३६ वागुण्यः२ गुणनफळं २४ वागुण्यः१ गुणनफळं १२ वागुण्यः१ गुणनफळं ६ वागुण्यः४ गुणनफळं वागुण्यः३ गुणनफळं १ इति॥ अनयैवयुक्त्यागुण्यस्यपरमोपचयेनभाव्यं॥ परमापचयेचशून्यतैवपर्यवस्यतीतिशून्येगुण्यगुणनफळंशून्यमेवेतिसिद्धं॥ यद्वागुण्येएकैकापचयेगुणनफळेगुणकतुल्योपचयोभवतियथागुणकः८ गुण्यः ४ गुणनफळं ३२ गुण्ये३ गुणनफळं२४ पुनरेकोनेगुण्ये २ गुणनफळं १६ पुनरेकोनेगुण्ये १ गुणनफळं ८ पुनरेकोनेगुण्य० अत्रापिगुणनफळे गुणकतुल्येनपचयेनभाव्यमिति॥ तथासतिगुणनफळेशून्यनैवसिद्धं॥ गुणकापचयवशादपि गुणनफळेगुणनफळापचयात्॥ गुणकस्यापिशून्यत्वे गुणनफळं शून्यमेवेतिसिद्धं॥ ननुगुणकवैलक्षण्यात्॥ एकस्मिन्नपिगुण्यगुणनफळवैचित्र्यमस्ति॥ तत्कथंशून्येगुण्येगुणकवैलक्षण्ये

पि गुणफलं शून्यमेवेति चेत्॥ न॥ अप्रयोजकत्वात्॥ अन्यथा एकाति रिक्त संख्याया वर्गमूल घनघन मूलादी
नां वैलक्षण्य व्याप्तेने कसंख्या अपितेषां वैलक्षण्यापत्तेः॥ वतस्तु गणको स्यार्वनकः सनिगुण्येगुण्यस्य गुणक
तुल्यावर्तनाद्गुणनफलं भवतीतिगुणकवैचित्र्येसतिगुणनवैचित्र्यं॥ ह्रस्वतुआवर्त्तनीयगुण्यस्याभावात्॥ गुणक ह्रस्वमपिकमावर्तयेदितिगुणनफलस्याप्यभावइति॥ एवं भाज्यापचयावशात् भजनफलापचयोस्तीतिभाज्ये शून्येभजनफलंशून्यमितिपूर्वयुक्त्यैसिध्यं॥ वर्गादेश्च द्वितीयसंख्यानिरपेक्षत्वात् वर्गादिसंख्याया भावाच्चभा वइति स्पष्टं॥ तदेवमुपपन्नंवधादौवियत्खस्यखंखेनघातइति॥ खहरोपपत्तिस्तूदाहरणावसरे वक्ष्यते॥ अत्रोदाहरणानांइवज्रोत्तरार्धेनाह॥ द्विघ्नंत्रिहतंखंखहृतंत्रयंचशून्यस्यवर्गे वदमेपदे च॥ अत्र द्वाभ्यांहन्य तेनद्विघ्नंव्यत्यत्याशून्येगुण्येद्वेहतीतिव्यत्यत्याशून्येगुणकेचएथगुदाहरणेदृष्टव्यं॥ शेषंस्पष्टं॥ प्रथमेन्या सगुणकः२ गुण्यः० गुणनफलं वधादौवियत्खस्येति जातं० द्वितीयेन्यासः गुणकः० गुण्यः२ खं खेन घात इतिजातं०॥ अथभागहारेप्रथमोदाहरणेन्यासः भाजकः३ भाज्यः० वधादौवियत्खस्येति जातंभजनफलं ०॥ द्वितीयेन्यासः भाजकः०भाज्यः३ खहारोभवेत्खेनभक्तश्चराशिरिति जातः खहरः३॥ ननुराशियेनहियते सतत्तत्खरोभवतीतिराशेः खेनहरणेखहरोभवेदितितुस्पष्टमेवास्तिकिंतु खेनराशौहृतेकालब्धिरितिप श्नस्यकिमुत्तरमित्यत आह॥ अयमनंतोराशिः खहरउच्यतइति॥ लब्धिरनंतेत्यत्तरमेवेतिभावः॥ एतस्या नंतत्वेयुक्तिस्तुअस्तियथायथाभाजकापचयः स्तथातथालब्धेरूपचयः नथासतिभाजकेपरमामचितेलब्धेपरमोपचयेनभाज्यं॥ लब्धेश्चेदियतोव्येतनहिपरमत्वं नस्यान्ततोप्यधिकासंभवात्॥ अतोलब्धेरियत्ताभावएव॥ परमत्वंतदेवमुपपन्नंखहारोराशिरनंतइति॥ अथानंतपदसंजातभरंस्मरन्भीगवतो व

नमःश्रीभास्करीचार्यप्रसंगेनस्तुतोहरिः कृतार्थतांसंपादयतीतिदृढनिश्चयः॥ खहरराशेरविकारतादृष्टांतप्रसंगेन श्रीभगवंतमनंतंस्तौति॥ अस्मिन्विकारःखहरेनराशाविति॥ उपजातिकेयं॥ अस्यार्थः॥ प्रलयकालेश्रीभगवत्यनं तेचक्षेबहुष्वपिभूतगणेषुप्रविष्टेषुलीनेष्वपिवानिस्तेषुदेहादिनतयाभगवतोनंतात्स्वरूपभूतेष्वपियद्यूद्भूतो रो नास्ति॥ निहितेषुप्रविष्टेषुमहान्भवतिनिस्तेषुवालघुर्भवति॥ तथास्मिन्खहरेराशावपिबहुष्वपिअंकेषुप्रविष्टे षुनिस्तेषुवाविकारोनास्तीति॥ ननुकथंविकारोनास्तीति॥ नहीशनिदेशः॥ योगेवियोगेवाव्याप्तिसिध्यत्वात्॥ सत्यं॥ सर्वत्रयोगांतरंवासमच्छेदइत्वेभवति॥ प्रकृतेसमच्छेदतोविधायेवयोगेनूरंवाविधेयं॥ समच्छेदनाच अन्योन्य हाराभिहतोहरांशाविनादित्यनेन॥ तथाचखहरस्यराशेर्हरणंशून्येनापरराशेर्गुणनेशून्यमेवभवति॥ शून्ययो गवियोगयोश्चाविकृतत्वं पूर्वमेवोक्तं॥ ननुयद्यप्यभिन्नराशिनायोगांतरयोर्भवत्यविकृतत्वं तथापिभिन्नराशि नायोगेनरेचत्वदुक्तरीत्याभवेदेवविकारः॥ यथा३।१ अन्योन्यहाराभिहतोहरांशाविनादिनाज्ञातोतुल्यहरो॥ ९।१ अनयोर्योगवियोगज्ञातं९ अथयद्युच्यतेएकस्यहरेणयेनकेनविदंकेनवापरराशिहरंवागुणनमात्रेण तुल्यत्वेज्ञातेपरतःश्रमोव्यर्थएव॥ प्रकृतेपिखहरराशेर्हरणेशून्येनापरराशिहरं९ शगुणनमात्रेणतुल्यहरस्य ज्ञानत्वात् योगेनरेचनास्त्येवविकारइति॥ नहिखहरस्यखहरेणभवेदेवविकारः॥ ३।६ अनयोस्तुल्यहरत्वाद्धो गेज्ञाते६ तत्कथंनविकारइतिचेत्॥ मैवं॥ अत्रापिफलतोविकाराभावात्॥ नहिखेनभक्तेषुत्रिषुन्यत्फलंअष्ट सुभक्तेषुचतुरहृतिः॥ किंतुभयत्राप्यनंतत्वेनव्यभिचारइति॥ यथोदयकालेन्यूनाधिकपरिमाणयोरपिशशिको ष्ठयोरनंत्यमव्यभिचरति॥ यथावावर्तमानेस्मिन्कालेभविष्यतिचकल्पसंख्यान्यूनाधिकभावेप्यनंतत्वाव्यभि चारइतिसर्वमनवद्यं॥ एवंभवतिभद्रिरन्यदप्यूह्यं॥ शून्यस्यवर्गः वर्गमूलं०एव घनादिष्वपिशून्यतैव॥ श्री॥

देवज्ञवर्यगणकसंनतसेव्यपार्श्वेबल्लालसंज्ञगणकात्मजनिर्मितस्मिन्॥बीजक्रियाविरचिते करणे षडुधस्य॥
॥इतिरवषडुधप्रकरणं॥ग्रंथोऽत्र १७९॥अथयद्यपिकरणे षडुधंव्यक्तवादुक्तषडुधस्यांतरंगमितिप्रथमतस्तन्निरूपणंबहिरंगमव्यक्तषडुधंपश्चात्तन्निरूपणीयमितियुक्तं॥तथापिकरणीषडुधस्यातिकोननयातन्निरूपणप्रयासबाहुल्यादव्यक्तषडुधनिरूपणेचप्रयासःलाघवात्सूचीकटाहन्यायेनाव्यक्तषडुधं प्रथमतोनिरूपयति॥तत्रद्वित्र्यादीनांराशीनांअव्यक्तत्वेसंज्ञाभेदमंतरेणतत्संकरस्यादतस्तन्निरासार्थमव्यक्तसंज्ञाःशाकिन्याह॥यावत्तावत्कालकोनीलकोन्योवर्णःपीतोलोहितश्चेतदाद्याः॥अव्यक्तानांकल्पितामानसंज्ञास्संख्यानंकर्तुमाचार्यवर्यैः॥यावत्तावदादिकंनामकालकःनीलकःपीतःलोहितःएतन्नाद्याःहरितश्वेतचित्रकादयोनेकवर्णसमीकरणपाठिताःवर्णाःअव्यक्तानामव्यक्तराशीनांसंज्ञाआचार्यवर्यैःकल्पिताः॥नामप्रयोजनमाह॥तत्संख्यानंकर्तुमिति॥तेषामज्ञातराशीनांसंख्यानंगणनांकर्तुसाधयितुंज्ञातुमितियावत्॥एवमव्यक्तसंज्ञाभिधायतत्संकलनव्यवकलनेउपजातिकापूर्वार्धेनाह॥योगोनरंतेषुहरीति॥तेषुवर्णेषुमध्येरूपेक्षित्यपिद्रष्टव्यं॥समानजात्योःसमानाजातिर्ययोस्तौतथानयोःसमानजात्योःपूर्वंकंयोगोनरंवस्यात्॥अत्रस्यादितिपदमुत्तरदलस्थमन्वेतिदेहलीदीपन्यायेन॥एवंकस्थितिःस्यादितिवापाठः॥समानजात्योरित्यपवक्षणंसमानजातीनामपिद्रष्टव्यं॥यद्वाबहूनामपियोगेद्वयोर्योगस्यैवमुख्यत्वात्॥युगपत्सर्वयोगंकर्तुमशक्यत्वाद्विवचनं॥जातिश्चात्ररूपत्वं॥यावत्तावत्वंकालकत्वंणीलकत्वंयावत्तावद्वर्गत्वंयावत्तावद्घनत्वंयावत्तावद्वर्गवर्गत्वंयावत्तावत्कालकभावित्वंइत्यादियोज्ययोजकनिष्ठसकलजातिव्याप्त्यायोज्ययोजकनिष्ठाच॥नत्वंकत्वं॥अंककोष्ठकोविशेषणवैयर्थ्यापत्तिः॥व्यावृत्त्यभावात्॥वर्णकोष्ठकोवर्णकल्पनानर्थकाप्रसंगात्॥असंकरार्थंहिवर्णकल्प

१२

ना॥वर्णत्वजात्यासाजात्यविवक्षितेसंकरणएवस्यात्॥तस्माद्रूपविधजात्येवसजात्यंविवक्षितं॥यद्वासमानज्ञाद्रूप्यतुल्यार्थत्वात्॥योज्ययोजकयोःस्वस्वनिष्ठसकलजातिभिःसाजात्यंविवक्षितं॥विभिन्नजात्योश्च॥चस्त्वर्थे॥विभिन्नाजातिर्ययोस्तयोर्योगेनरेक्रियमाणेपृथक्स्थितिश्च॥वोवधारणे॥पृथक्स्थितिरेवस्यादित्यर्थः॥एतदुक्तंभवति॥रूपस्यरूपेणयावत्तावतोयावत्तावतःकालकस्यकालकेनकालकवर्गस्यकालकवर्गेणकालकघनस्यकालकघनेनकालकनीलकभावितस्यतद्भावितेन॥एवंसमानजात्योर्योगेनरेवाकर्तव्येयोगोनरेवाउक्तवद्भवति॥रूपस्ययावत्तावत्कालकादिभिःक॥वा॥यावत्तावतःकालकादिभिः॥यावतोयावद्वर्गेणयावत्तावद्घनस्ययावत्तावद्वर्गेणभावितादिभिर्वा॥एवंभिन्नजात्योर्योगोनरेवाकर्तव्येपृथक्स्थितिरेव॥अत्रैकपंक्तावितिद्रष्टव्यं॥अन्यथायोगोनरज्ञापकाभावादिति॥अत्रोपपत्तिःसिद्धमेव॥अन्यथासमानछेदविधानपूर्वकंयोगोनरकथनंनस्यात्॥किंचविभिन्नजात्योर्योगःकिमात्मकःयथाराशिद्वयमंशापंचकंअंशाद्वयंचेत्यनयोर्विभिन्नजात्योर्योगःक्रियतेतर्हिसप्तस्यःतेसप्तनरज्ञायोनवात्वा॥नहियद्देणराशिपंचकमंशाद्वयंचेतिअनयोर्विभिन्नजात्योरपियदियोगःक्रियतेतर्हिसप्तस्यः॥तेसप्तरानरज्ञायोनवात्वा॥भुक्तमित्यत्रेयद्देणसप्तराशयःसप्तत्वाभुक्ताइतिकस्यापिप्रतीतिरुपपद्यते॥किंतुग्रहेणकियद्भुक्तमस्तीतिप्रतीतिरेवनक्ता॥तत्रैवसाजात्येयोगोभवत्येव॥यथाराशिद्वयंस्यात्तदाः६०पंचभिर्लवैर्योगेजाताःपंचषष्टिलवाः६५ग्रहेणराशिद्वयमंशापंचकंभुक्तमित्यत्रेपंचषष्टिलवाभुक्ताइत्यस्त्येवप्रतीतिःसर्वसंप्रतिपन्नेत्यादिसर्वंसुधीभिरूह्यं॥नन्वेवंवर्णेष्वपिसाजात्यंविधाययोगोस्त्विति चेन्न॥वर्णमानानांअज्ञातत्वात्साजात्यविधानस्याशक्यत्वात्॥अतएवतन्मानोच्छापनानंतरंसाजात्येनयोगोभवत्येव॥एवंवियोगेप्युपपत्तिरीदृश्या॥अत्रोदाहरणानिभुजंगप्रयातेनाह॥स्वमव्यक्तमेकंसरूपेसकरूपमि

ति॥एकरूपसहितमेकं धनमव्यक्तमित्येकः पक्षः॥रूपाष्टकरहितं धनमव्यक्तयुग्ममितिद्वितीयः॥एतयोः पक्षयोः युतौ किंपक्वं स्यात्॥अथवपक्षयोर्धनर्णविपर्ययस्यैक्ये किंपक्वं स्यादिति अत्रपूर्वपक्षमात्रव्यत्यासादुभयपक्षव्यत्यासाच्चप्रश्नत्रयंव्यत्यासाभावेचैकउदाहरणंचतुष्टयं॥धनर्णेइत्यत्रप्रधानोनिर्देशः॥यद्वाअव्यक्तंरूपेइत्याध्याहृत्ययोजनादृष्टव्या॥एकमव्यक्तमितिं॥या१ एकंरूपमिदं॥रू१ अनयोर्योगेद्वयंनभवतिभिन्नजातित्वात्॥किंतुपृथक्स्थितिरेवेतिजातः एकःपक्षः या१ रू१ एवंधनाव्यक्तयुग्मंया२ अस्माद्रूपाष्टकेशोध्यमानंस्वमूलमेतीतिजातमूलंरूपाष्टकं ८ अनयोर्धनर्णयोरंतरमेवयोगइतिऋणगताःषट् ६ नभवंति॥किंत्वेकपक्षंकृत्वापृथक्स्थितिरेवतथाकृतेजातोद्वितीयपक्षःया२ रू८ योगार्थमुभयोन्यासःया१ रू१ अनयोर्योगेकर्तव्येसमानजात्योरेवयोगइतिअव्यक्तमव्यक्तेनरूपंरूपेणचसंयोज्यं तथाया२ रू८ योगेकृतेजातंया३ रू७ आद्यपक्षेधनर्णत्वेविपर्ययस्यन्यासःया१ रू१ अनयोरव्यक्तवद्योगेजातंया१ रू८ द्वितीयपक्षेव्यत्यासेन्यासःया१ रू१ योगेजातंया१ रू९ उभयोर्धनर्णव्यासेन्यासःया१ रू१॥ या२ रू८ योगेजातंया३ रू७ एवंद्वयोर्भिन्नजातित्वेसत्युदाहरणान्युक्तानि॥अथत्रयाणांविजात्येसत्युदाहरणंभुजंगप्रयातपूर्वार्धेनाह॥धनाव्यक्तवर्गत्रयंसत्रिरूपमिति॥त्रिभिःरूपैःसहितंधनमव्यक्तवर्गत्रयं ३ क्षयाव्यक्तयुग्मनयुक्तंकिंस्यात्तच्चाशुवदेतिपूर्वेणान्वयः॥अत्रोक्तवज्जातंधनाव्यक्तवर्गत्रयं ३ सत्रिरूपं याव ३ रू ३ अयंपक्षःऋणाव्यक्तयुग्मनानेनया२ योज्यःइदमव्यक्तयुग्मेनवर्गःसयुज्यतेनापिरूपैभिन्नजातित्वात्॥तस्मात्पृथक्स्थितिरेव॥तत्रक्रमस्तु॥आदौवर्गघनस्यतनोवर्गवर्गस्यघनस्यतनोवर्गस्यतनोव्यक्तस्यतनोरूपाणामित्याह॥तथास्थितौजातंयाव ३ या२ रू३ एवंकालकादिष्वपिबोध्यं॥अथोत्तरार्धेन व्यवकलनोदाहरणमाह॥धनाव्यक्तयुग्मादृणाव्यक्तषट्कमुक्तवज्जातं या ६ रू८ एतत्धनाव्यक्तयुग्मादस्मा

१२

त्या२ विशोध्यंतत्रसंशोध्यमानंस्वमूलमेतीत्यादिना जातःशोध्यःपक्षःया६ रू८ एतन्मध्येअव्यक्तमेवसाजातीयत्वात्योज्यंरूपाणांतुपृथक्स्थितिरेवेतिनथाकृतेजातं॥या८ रू८॥एवंसंकलनव्यवकलनेअभिधायोपजातिकोत्तरार्धेनोपजातिकयाचवर्णगुणनमाह॥स्याद्रूपवर्णोभिन्नविधेत्यादि॥अस्यार्थः वर्णगुणनंत्रिविधंसंभवति॥रूपेणसजातीयवर्णेनविजातीयवर्णेनवा॥तत्ररूपेणगुणनेस्याद्रूपवर्णोभिन्नोतुवर्णइति॥रूपवर्णोभिन्नोतुवर्णःस्यात् अयमर्थः॥रूपेणवर्णेगुणनीयेवर्णेनवारूपंगुणनीयेअंकतस्तुगुणनफलंभवति॥नामतुवर्णस्यैव॥अथसजातीयवर्णेनगुणनेसजातीयकानांहृद्यादिकानांवर्णीनांवधेतुतद्वर्गघनादयःस्युःएतदुक्तंभवति॥यावतावतायावतांवीतगुणितेसमजात्येईयोघातइतियावद्वर्गःस्यात्॥सचेत्पुनर्यावत्तावन्नागुण्यतेतदासमत्रिघातत्वात्यावद्वर्गोनस्यात्अयमपिचेत्तेनैवगुण्यतेतदासमचतुर्घातत्वात्यावद्वर्गवर्गोभवेत्॥असापितेनगुणितश्चेत्तदापंचघातत्वात्॥यावद्वर्गघनः॥एवंषड्घातेयावद्वर्गघनोभवेत्॥इत्यादि॥कालकादीनामपिसमत्र्यादिवधेकालकादिवर्गघनाद्योज्ञेयाः॥अथविजातीयवर्णेनगुणितेसमजातिघातेनहृद्वितंस्यादिति॥विजातीयवर्णयोर्घातेनयोर्वर्णयोर्भावितंस्यात्॥यथा॥यावत्तावतिकालकेनगुणितेयावत्तावत्कालकभावितंभवति॥कालकेननीलकेगुणितेकालकनीलकभावितंभवति॥इत्यादि॥यावतावत्कालकभावितंयदिकालकेनगुण्यतेयावतावत्कालकवर्गोभवतीत्यादिसुधीभिरूह्यं॥एवंगुणनेविशेषमुक्त्वाभागादिकमाह॥शेषंभागादिकंभागवर्गवर्गमूलघनघनमूलादिव्यक्तेगुणितेउक्तंतदत्ररूपवज्ज्ञेयं॥भाज्यादधरःभध्यतियद्गुणःस्यादित्यादिनाभाजनफलंज्ञेयं॥समहिघातःकृतिरुच्यतइत्यादिनावर्गोज्ञेयइत्यादि॥भागादीनांगुणनपूर्वकत्वागुणनसंज्ञाविशेषस्यचोक्तत्वात्तत्रकोपिविशेषोवक्तव्योनास्तीतिभावः॥इदमुपलक्षणं॥अत्रासंकरार्थंगुणनफलसंज्ञामात्रमुक्तं॥अंक

तस्तुगुणनादिकं व्यक्ते गणितेयदुक्तं तदत्रज्ञेयमित्यपिद्रष्टव्यं॥ एवमत्रगुण्यांकमेत्यं गुणके नहन्यादित्यादिनागुण
नफलसिद्धावपिशिष्यसेकर्यार्थं गुण्यस्त्वधोधोगुणखंडतुल्यइत्यादिव्यक्तोक्तखंडगुननेवसेनतिळकयाविषय
ति॥ गुण्यः पृथग्गुणकरवंडसमोनिवेश्यइति॥९॥ गुणकस्ययावंतिखंडानितावत्सुस्थानेषुपृथक्गुण्योनिवेश्यः॥
अत्रखंडानिसंज्ञाभेदनावगंतव्यानि॥ यथा॥ गुणकः या३ रू२ अत्रसंज्ञाद्वयात् द्विगुणकस्यखंडद्वयं॥ यथावागुणकः
याव२ या३ का५ अत्रसंज्ञात्रयाद्गुणकस्यखंडत्रयमित्यादि॥ अथपृथग्निवेशितोगुण्यः तैः गुणकखंडकैः प्रथमास्था
नेप्रथमखंडकेनहतोयस्स्थानेहतायेनतृतीयस्थानेतृतीयेनेत्यवंक्रमेणस्वाध्यपर्वणाभिहतौतुवर्णइत्यादिनागु
णितः सन्यथोक्तयापूर्वोक्तप्रकारेणयोगोंतरंतेषुसमानजातेरित्यादिनायोगेयुतिःस्याक्षययोः स्वयोर्वेत्यादिनाचस
हितः अत्रव्यक्तगणिते॥ अव्यक्तवर्गकरणगुणनाविधिरेवचिंत्यः॥ एवमन्येपिगुणनप्रकाराद्रष्टव्याः॥ अत्रोदाहरणानिग्रा
ह्यिन्याह॥ यावत्तावत्पंचकंज्येकरूपमिति॥ गुण्येगुणेवाव्यक्तंस्वर्णइतिचपाठत्रयंप्रसिद्धमस्ति॥ तत्रपूर्वलिखितपाठना
वदियंव्याख्या॥ स्वर्णंगुण्यंस्वर्णंगुणंवाव्यक्तंकल्पयित्वेति॥ गुण्येगुणेवेतिपाठेगुण्येविद्यमानंस्वर्णंययथासंभवंस्वंस्वंऋणं
यावत्कालकरूपादिव्यक्तंकल्पयित्वेतिएवंगुणेपि॥ अथमितिपाठेगुण्येगुणंवाव्यक्तंस्वर्णंकल्पयित्वाव्यक्तस्वर्णंय
थासंभवंस्वमृणंचयावत्तावदादियत्रतंतादृशंकल्पयित्वेत्यर्थः॥ अत्रसर्वत्रविशेषणेहिविधिनिषेधोविशेषणमुपसं
क्रमतोविशेष्येबाधेसतीतिन्यायेनस्वर्णक्षयोरेवव्यक्तत्वविधानंद्रष्टव्यं॥ शेषस्पष्टं॥ अत्रयथासिद्धितिगुण्यगुणकयो
रेकमुदाहरणं॥ गुण्यमात्रव्यत्यासेद्वितीयं॥ गुणकमात्रव्यत्यासेतृतीयं॥ चकारादुभयव्यत्यासेचतुर्थमितिचत्वार्युदा
हरणानि॥ अत्ररूपोनंयावत्तावत्यंचकंगुण्यः या५ रू१ रूपद्वययुतंयावत्तावत्त्रयंगुणः या३ रू२ गुण्यः पृथग्गुणकरवं १४
डसमोनिवेश्यइत्यादिनागुणनार्थंन्यासः | या५ रू१ / या५ रू१ | अत्रयावत्तावत्त्रयेणक्षयरूपेगुणितेस्वर्णघातेइत्येकतः३

यावत्तावत्पंचकेगुणितंकृतःपंचदश१५ अक्षरतस्तुद्वित्र्यादिकानांवधेनहूर्गघनादयःस्युरित्यादिनाजातायावत्तावद्वर्गा॥
तत्रयावत्तावतोवर्गस्यचाव्यक्षरोपलक्षणार्थंलिखनेसंपन्नेयाव१५ अत्रयावत्तावत्त्रयेणक्षयरूपेगुणितेस्वर्णघातेइत्येक
तः३ अक्षरतस्तुसंपर्वणाभिहतौवर्णस्यादितिजातोवर्णएवया३ एवंप्रथमपंक्तौजातंयाव१५ या३ अक्षरहीनायस्थानोद्वि
तीयेनगुणकखंडेनरू२ यावत्तावत्पंचकेगुणितंकृतोदश१० अक्षरतस्तुरूपवर्णोभिहतौवर्णइतिजातोवर्णः या१० रूपद्व
येनक्षयरूपेगुणितेस्वर्णघातेक्षयइतिजातं२ अत्राक्षरसंज्ञाव्यक्तेप्रसिद्धैव॥ नहिव्यक्तेद्वित्र्यादिघातेसंज्ञाभेदोस्ति॥ रू
पंतुव्यक्तमेव॥ अतोरूपस्यरूपेणगुणनेअक्षरतोरूपमेव॥ तथासतिजातंरू२ एवंजातंद्वितीयपंक्तौगुणनफलंया१० रू२
एवमुभयपंक्त्योर्न्यासः॥ | याव१५ या३ / अत्रयथोक्तन्यासहितरीतियोगोंतरंतेषुसमानजातेरित्यादिना॥ तत्रप्रथमपं
यावत्तावत्त्रयमूर्णंहितौ | या१० रू२ | क्तौयावत्तावद्वर्गकधनंअनयोःसाजात्याद्योगेधनर्णयोरंतरमेवयोगइतिजा
तंयाव३ इतरयोर्भिन्नजातित्वात्पृथक्स्थितिरेव॥ तथाकृतेजातंगुणनफलंयाव१५ या७ रू२ अथगुण्येधनर्णव्य
त्यासंकृत्वाद्वितीयोदाहरणेन्यासः | या३ / या२ रू१ | गुणकखंडाभ्यांगुणेनजातं | याव१५ या३ / यथोक्तन्यायेनयोगेजातंगु
नफलंयाव१५ या७ रू२ अथगुणके | रू२ / या२ रू१ | धनर्णतांव्यत्यासंकृत्वातृतीयो | या० रू२ | दाहरणेन्यासः ८.३
या३ या२ रू१ | गुणनेजातं | याव१५ या३ / योगेजातंयाव१५ या७ रू२ चतुर्थोदाहरणेन्यासः | या३ या२ रू१ | गुणितंजातं
रू२ या५ रू१ | याव१० या३ / यथोक्तंजातंगुणनफलंयाव१५ या७ रू२ अत्रोपपत्तिः॥ रूपैः रूपेषुगुणितेषु रूपाणिभ
वंतीतिप्रसिद्धं॥ रूपवर्णेगुणितेरूपंवाभवेद्वर्णोवाविनिगमनाविरहेसतिकथंवर्णएवेत्युक्तं॥ उच्यते॥ अज्ञानरा
शिमानेनावज्ञातुंधैर्यंसंभवति॥ रूपसमूहस्तद्वयवोवारूपंवारूपावयवोवेति॥ अत्ररूपसमूहत्वमज्ञानराशेरं
गीकृत्ययुक्तिरुच्यते॥ अस्मिंकिंचिदन्यत्संपाद्यतेनमानेनेकंमानं१ इदंसप्तगुणितंसप्तगुणितं७ एतस्यगुणनफ

कस्यरूपात्मकत्वंसमूहात्मकत्वंवेतिविचार्यं॥तत्राद्यस्यरूपात्मकत्वेसप्ताढकधान्यमिदमितिस्यात्॥नचेतद्युक्तं॥गुणनात्पूर्वमेवसप्ताढकस्यधान्यस्यविद्यमानत्वात्॥गुणनोत्तरंत्वेकोनपंचाशदाढकाभाव्याः॥अतःसमूहात्मकंवक्तव्यं॥तथासतिसप्ताढकधान्यसमूहाःसप्तैत्यपपन्नंस्याद्रूपवर्णाभिहतोवर्णइतिअथाज्ञातराशेरूपसमूहावयवत्वमुररीकृत्ययुक्तिरुच्यते॥अस्तिसप्ताढकस्यमानस्यज्ञेयराशिमानेमानेनमानेनास्तिधान्यमिति१इदंत्रिगुणितं३अस्यरूपात्मकत्वेआढकत्रयमेवस्यात्॥तच्चायुक्तं॥आढकसप्तकत्र्यंशेहित्रिगुणितेआढकसप्तकेनभाव्यं॥अतएतस्यसमूहावयवात्मकत्वं॥तथासतित्रयआढकसप्तत्र्यंशाइतिस्यात्॥एवमप्युपपन्नंस्याद्रूपवर्णाभिहतोवर्णइति॥अथरूपावयवत्वमज्ञातराशेरुररीकृत्योच्यते॥अस्याढकचतुर्थांशमितिमानेएतन्मितंधान्यंप्रस्थमितंभवति॥इदंत्रिभिर्गुणितं३नेदंरूपात्मकं॥अस्यरूपात्मकत्वआढकत्रयंस्यात्॥नचेतद्युक्तं॥तस्माद्रूपावयवात्मकत्वंअस्यवक्तव्यं॥तथासतिआढकचतुर्थांशास्त्रयइतिभवतिप्रस्थात्त्रयं॥एवमप्युपपन्नं॥रूपवर्णाभिहतोवर्णइति॥अथाज्ञातराशेरूपत्वेवर्णरूपयोरभेदात्गुणनफलेवर्णतापियुक्तैव॥नचगुणनफलेरूपमेवास्तुतस्यापियुक्तत्वादितिवाच्यं॥अज्ञातराशेरूपत्वेनागमाभावाद्वात्॥अवधृतेहिराशेरूपत्वंगुणनफलेरूपत्वमेवयुक्तं॥अत्रतुराशेरज्ञानात्रूपत्वान[illegible]धारणात्॥नचैवंगुणनफलेवर्णत्वमेवकथंस्यात्रूपसमूहत्वादिनाराशेरनवगमादितिवाच्यं॥नहिरूपवर्णनयोर्गुणनफलेस्यवर्णत्वेरूपसमूहत्वादिनाप्यवगमोराशेरावश्यकः॥किंतुतस्यचतुष्टयसाधारणत्वात्॥चतुष्टयान्यतमेनेवराशेरवगमोपेक्षितःसवास्येव॥चतुष्टयान्यस्यराशेरसंभवात्॥अतएवलाघवाद्वर्णत्वपुरस्कारेणप्रकृतगुणनफलस्यवर्णत्वमुक्तमाचार्यैरित्यपपन्नंस्याद्रूपवर्णाभिहतोवर्णइति॥किंचरूपंहिव्यक्तसंख्या॥तथागुणनैकतएवगुणनंनाक्षरतः॥नचरूपव्यक्तसंख्ययोरभेदेसंख्याज्ञापकांकलिखनमेवास्तुकिंरूपप्रथमाक्षरलिखनेनेतिवाच्यं॥अंकस्यभेदकाभावेवर्णांकसन्निधानेनकदाचित्संकरःस्यादितिअसंकीर्णार्थंरूपाक्षरलिखनात्॥अ

१५

नएवमतिरेखादिकेभेदकेनास्त्येवाक्षरलिखनोपयोगःकिंतुज्ञाप्योपस्थितयेतत्॥एवंयावद्दुर्गादिनामपिरूपगुणनेक्षरतोनविकारइत्यादिसुधाभिरूह्यं॥अथसमजातिवर्णगुणनेनत्रवर्णस्यरूपसमूहत्वमुररीकृत्ययुक्तिरुच्यते॥आढकसप्तकस्यैकःसमूहः१अन्यैवास्मिन्गुणितेज्ञातं१अस्यआढकसप्तलक्षणसमूहात्मकत्वेएकगुणितसमूहस्यसमूहगुणितसमूहस्यवाभेदापत्तिः॥नचाभेदापत्तिः॥एकस्मिन्गुण्येगुणकभेदात्गुणनफलस्यावश्यकत्वात्॥अतोगुणनफलस्यसमूहवर्गात्मकंवक्तव्यं॥तथासत्येकोनपंचाशदाढकाःस्युःयुक्तैवैतत्॥अतःसमानजात्योर्द्वयोर्वर्णयोर्वधेनदुर्गोभवतीत्यपपन्नं॥एवंसमूहावयवत्वमंगीकृत्ययुक्तिरुक्तेव्या॥एवंत्र्यादीनांसमजातिकानांवधेघनादित्वमप्युह्यं॥तदेवमुपपन्नोद्व्यादिकानांसमजातिकानांवधेनुतद्दुर्गघनादयःस्युरिति॥अथसमजातिघाते॥आढकसप्तात्मकःएकःसमूहः१आढकपंचात्मकोन्यः१अनयोर्वधेजाते१नायमाढकसप्तात्मकःसमूहः॥तस्यैवगुणकस्यसमूहगुणितस्यचाभेदापत्तेः॥नापंसमूहवर्गः॥समूहस्यस्वेनगुणनेसमूहांतरेणचगुणनेगुणनफलस्याभेदापत्तेः॥अतःसमूहयोर्वधोयमेकः तथासतिपंचत्रिंशदाढकाःस्युः॥युक्तैवैतत्॥तस्मादसमजातिघातेनयोर्घातइत्यक्षरतोभावितुंयुक्तं॥तत्राद्येघातस्यभावितमितिसंज्ञालक्षणतः॥वधशब्दस्याप्याक्षरलिखनेआश्रीयमाणत्वात्॥हतिशब्दस्याप्याक्षरलिखनेसंकरादिदोषोनास्ति॥अस्तुतर्हिहतिलेखनंनकदाचिल्लिखितिः॥किंत्वाचार्येणघानुरोधाद्भावितमितिसंज्ञालक्षणेत्यपपन्नंतद्भावितंचासमजातिघातइति॥स्वेउगुणनोपपत्तिः॥स्पष्टैव॥अथभाज्यहरःशुध्यतीत्यादिनाभजनफलसिद्धावपिवर्णसंज्ञावधानार्थंमंदावबोधनार्थंचपुनःराशिन्याविषदयति॥भाज्याच्छेदःशुध्यतिप्रच्यतःसन्निति॥छेदोहरःसंख्यैर्वर्णैरूपैश्चगुणितःसन्भाज्यास्वेषुस्वेषुस्थानेषुयथास्वंसमजातिषुप्रच्युतःसन्शुध्यतिनावशिष्यतेनाअत्रलब्धयस्यः॥तेवर्णास्तानिचरूपाणिलब्धयस्यरित्यर्थः॥अत्रयेगुणितोहरोभाज्याच्छुध्यतिनावशिष्यतेषुअधिकःलब्धिर्भवतीतिद्रष्टव्यं॥अन्यथान्यूनगुणोपिहरःशुध्यतीतिन्यूना

अपि लब्धयः स्युः ॥ यद्वा भाज्योऽपि शुध्यतीति द्रष्टव्यं ॥ तालब्धयद्दत्यत्र तच्छब्दस्य विधीयमानलिंगतारूपेति ज्ञेयं हियत्सा प्रकृतिर्ज्ञेयेत्यादौ प्रसिद्धेव ॥ दैवेयुगसहस्रेद्वे त्रयः कल्पेनुतोनृणामित्यस्यव्याख्यावसरेलिखितंवक्ष्यामस्वामिना ॥ सर्वनाम्नां विधीयमानानूद्यमानलिंगग्रहणेकामचारइति ॥ अत्रोदाहरणार्थं पूर्वगुणनस्यस्वगुणच्छेदस्यन्यासः ॥ तत्र भाज्यः याव १५ या ७ रू २ भाजकः या ३ रू २ अत्रभाज्ये प्रथमतोयावद्वर्गाः संतितेभ्योयावद्वर्गाणामेवशोधनेयुक्तं समानजातित्वात् ॥ अत्रहरेतु प्रथमतोयावत्रयमस्तिनस्यरूपेणगुणनेस्याद्रूपवर्णाभिहतोनुवर्णइतिवर्णएवस्यान्नतद्वर्गः यावतागुणनेपिसमानजातित्वात्तथापियावद्वर्गोभवेन्नतथाप्यंकतस्त्रयमेवेतिनशोधनेपिभाज्ययावद्वर्गाणांनशुध्यिः अतोयात्पंचकेनभाजकेगुणिते पंचदशायावद्वर्गाभवेयुः नथासतिशुध्यिर्भवेदितियावत्पंचकेनया ९ छेदोयंया २ रू २ गुणितः याव १५ या १० अस्मिन्भाज्यादस्मायाव १५ या ७ रू २ यथास्थानमपनीतेजातेया ३ रू २ यावत्पंचकेनगुणितःछेदः शुध्यतियावत्पंचकेलब्धिः या ५ अथभाज्यशेषेयावत्तावत्त्रयमस्ति ॥ अतोहरेरूपेणगुणितेनस्माच्छोधितेनस्यशुध्यिः स्यात्परं धनरूपगुणनेसंशोध्यमानेस्वमृणत्वमेतीतिदृयोर्ऋणत्वयोगः स्यादितिनशुध्यिः ॥ तस्मादृणरूपेणगुणितेतस्माच्छोधितेस्यशुध्यिः स्यादितिऋणऋणरूपेणरूपं हरोयंया २ रू २ गुणितः या ३ रू २ भाज्यशेषादस्मात्या ३ रू २ च्यतः शुध्यतीतिरूपमृणंलब्धिः रू १ एवंजातालब्धिः या ५ रू १ पूर्वगुण्योयं ॥ अथद्वितीयोदाहरणेभाज्यः याव १५ या ७ रू २ भाजकः या ३ रू २ उक्तवज्जातालब्धिः या ५ रू १ भाजकः या ३ रू २ उक्तवल्लब्धिः या ५ रू १ अथतृतीयोदाहरणेभाज्यः याव १५ या ७ रू २ अथचतुर्थोदाहरणेभाज्यः याव १५ या ७ रू २ भाजकः या ३ रू २ उक्तवल्लब्धिः या ५ रू १ ॥ अत्रोपपत्तिः ॥ भाज्यराशिस्तावत्कयोश्चिद्गुण्यकस्तु गुणकयोर्गुणनफलं ॥ भाजकस्तुगुण्यगुणकयोरन्यतरः ॥ तदितरोलब्धिश्चेतिस्थितिरस्ति ॥ तत्रास्मिन्गुणनफलेस्मिंश्चगुणकेसतिकोगुण्यइति ॥ वाअस्मिन्गुण्येसतिकोगुणकइतिलब्धिः प्रश्नार्थः तत्रगुणकोयेनगुणितःसन्

१६

गुणनफलसमोभवेत्सगुणः गुण्योवायेनगुणितः सन्गुणनफलसमस्यात्सगुणकइतिस्फैवयुक्तिः ॥ ननुतथाप्येतावदेववक्तव्यंयद्गुणितोहरोभाज्यसमस्यादिति ॥ ननुप्रच्युतःसन्शुध्यतीतिगौरवात् ॥ सत्यं ॥ असमेसमताभ्रमनिबंधनोलब्धौलब्धित्वभ्रमः स्यादितिनिरासार्थंप्रच्युतःसन्शुध्यतीत्युक्तं ॥ अन्यथाभाज्येस्मिन्याव १५ या ७ रू २ सतिहरेस्मिन्या ३ रू २ अनेनया ९ रू ९ गुणितेयाव १५ या ७ रू २ भाज्यसमताभ्रमेणलब्धिरियंया ९ रू १ इतिभ्रमस्यात् ॥ गौधनेतुसंशोध्यमानेस्वमृणत्वमेतीतिउभयेषांयावद्वर्णानांयावत्तावद्धनत्वोद्रूपयोश्चर्णत्वायोगेवैगुण्यंस्यात् ननुशुध्यिरितिलब्धित्वभ्रमोनस्यात् ॥ ननुविशेषादर्शनंभ्रमेप्रतिहेतुरितिप्रकृतेधनर्णत्वलक्षणेविशेषादर्शनाद्भाज्यसमताभ्रमस्तथागौधनेपिविशेषादर्शनस्यसत्वात्कथंभ्रमस्यादितिचेन्नैवं ॥ तत्रधनर्णत्वलक्षणविशेषस्यदर्शनमदर्शनंचसंभाव्यते ॥ गौधनेतुसंशोध्यमानेस्वमृणत्वमेतीतिधनर्णत्वाक्षेपात् नाविशेषदर्शनंसंभवतिकिंचभाजकोयेनगुणितोभाज्यसदृशोभवेत्तस्यनशीघ्रमुपस्थितिः गौधनेतुभाजेत्रप्रथमतःपंचदशायावद्वर्गाःदृश्यंतेभाजकेतुयावत्रयंतत्यदियावत्पंचकेनगुण्यतेतर्हि पंचदशायावद्वर्गाभवेयुः नथासतियावद्वर्गाणांशुध्यिः स्यात्दृश्यस्तिगौघ्रोपस्थितिः ॥ एवंभाज्यशेषशुध्यावपीत्यलंपल्लवितेन ॥ अथयद्यपिवर्गसूत्रमेतदुदाहरणंवक्तुमनुचितंतथापिवर्गसमद्विघातरूपत्वाद्गुणनसूत्रेणैवतत्सिध्येदव्यक्तवर्गकरणीगुणनास्तत्रेत्यादिविशेषोक्तेश्चैतदुचितमेवेतिज्ञाप्यन्यर्थेनतदाह ॥ रूपैः षड्भिर्वर्जिताना मिति ॥ स्पष्टोर्थः ॥ रूपषट्कोनमव्यक्तचतुष्टयमिदं या ४ रू ६ वर्गार्थमयमेवगुण्योगुणकश्चेतिन्यासः

या ४	याव ४	रू ६	स्थानद्वयेगुणिते	ज्ञातं
याव १६	या २४		योगेज्ञातोवर्गः	
या २४	रू ३६		वर्गेदृष्टेकस्यायंवर्गइति	मू

रू ६ या ४ रू ६ | श्लोकज्ञानार्थं उपायमुपजातिकयाह ॥ क्षतिभ्यआहायपदानितेषामिति ॥ ९१ ॥ तेषांवर्गराशिगतान्यक्तानांमध्येक्षतिभ्यःपदान्याहायतेषांपदानांपरस्परद्वयोद्वयोराभिहतिंद्विनिघ्नीशेषाद्विशोधयेत् यदिशुध्यिर्भवेत्तदातानितस्यवर्गस्यपदा

निस्थ रित्यर्थादुक्तं भवति॥ रूयोरित्यपि द्रष्टव्यं॥ अथयदि वर्गराशेरूपाणि संतितर्हि रूपपदं गृहीत्वाशेषेण तथैव द्वयोर्द्वयोश्चा
भिहतिर्द्विनिघ्नी शेषात्यजेदिति॥ रूपेषु सत्स्वयदि नलभ्येतेनदासवर्गराशिर्नेत्यर्थादुक्तं भवति॥ अत्रोदाहरणं॥ पूर्ववत्स्थ
वर्गस्यमूलार्थन्यासः॥ याव१६ या८ रू३६ अत्रवर्गराशेरेषोद्देशाद्यावद्वर्गाः षट्त्रिंशद्रूपाणिवेतिवर्गद्वयं अस्माद्गृहीतमूले
या४ रू६ अनयोर्द्वयोरभिहतेर्या२४ द्विनिघ्नी८ शेषात्यजेदिति संशेोध्यमानेस्वमूलत्वमेतीतिऋणयोर्योगे शुद्धिर्न
स्यादिति॥ द्वयोरन्यतरस्यऋणत्वंकल्प्यतेतथासतिद्वयोरभिहतिः द्विगुणितायाः८ संशेोध्यमानेस्वमूलत्वमेतीतिधन
त्वंधनर्णयोरंतरमेवयोगइतिशुद्धिःस्यात् अतोस्यया४ रू६ अस्यवायाः४ रू६ वर्गोयं याव१६ या८ रू३६॥ ननुरूपप
क्षेपकयुतस्ययावत्तावत्त्रयस्ययाः३ रू५ वर्गोयं याव९ या३० रू३५ अत्रक्षेपेभ्यआदायपदानीत्यादिनासर्वेभ्योपिमूललाभा
क्षेपाभावेद्वयोरभिहतिंद्विनिघ्नींकुतःशेोध्येतिचेत्॥ न॥ यावत्तायाः३५ मूलभावात्॥ नहियावदात्मकःकस्यापिवर्गः सं
भवतियदस्यमूलंसंभवेदितिसर्वमवदातं॥ अत्रोपपत्तिः॥ तत्रैकखंडात्मकेवर्गेकस्यायंसमद्विघातइतिसमद्विघा
न्वेषणेमूलावगमः सुगमः अथरखंडद्वयस्यवर्गार्थन्यासः | या४ या४ रू६ | या४ रू६ या४ रू६ | अत्रप्रथमपंक्तौवेकस्यखंडस्यवर्गः॥ रू
खंडद्वयाभिहतिश्च॥ द्वितीयपंक्तावपिरखंडद्वयस्याभिहतिर्द्वि
हतिरस्तीतियोगेद्विगुणिताद्विगुणिताहतिःस्यात्॥ अतःखंडद्वयस्यवर्गेरखंडत्रयंखंडवर्गोद्विगुणितःखंडद्वयाभि
तिश्च॥ यावत्ता१६ या८ रू३५ अथरखंडत्रयवर्गे | या३ या३ का८ नी५ | का८ या३ का८ नी५ | नी५ या३ का८ नी५ | अत्रप्रथमपंक्तौप्रथमरखंडवर्गः प्रथमद्वितीयरख
ण्डाभिहतिःप्रथमतृतीयरखंडाभिहतिश्च॥ द्वितीय खंडवर्गः प्रथमद्वितीयाभिहतिर्द्वितीयतृतीया
भिहतिश्च॥ तृतीयपंक्तौतृतीयरखंडवर्गः प्रथमत तीयाभिहतिः द्वितीयतृतीयाभिहतिश्चेति॥ एवं ३७
चतुरादिरखंडवर्गेष्वपि॥ तस्मात्सुष्ठूक्तं कृतिभ्य आदायेत्यादि॥ ननुवर्गराशाववश्यंरखंडवर्गोभवंतीतिकृतिभ्यः प

दान्यादायेत्यनेनैवचरितार्थत्वात् द्वयोर्द्वयोरित्यादिव्यर्थमितिचेत्॥ न॥ तथासतियत्रराशौ याव९ या८ रू९ एवमस्तितस्यापि
मूलंया३ रू३ स्यात् नचैतद्युक्तं॥ यतोस्यवर्गोयंयाव९ या१८ रू९ तस्माद्यदिमूलेषुगृहीतेषुद्वयोर्द्वयोर्द्विगुणाभिहतिःशे
ष्यतेतर्ह्यस्यवर्गत्वंनियमार्थंद्वयोश्चाभिहतिंद्विनिघ्नींशेषात्यजेदित्युक्तं॥ एवमेकवर्णषड्विधोदाहरणान्युक्त्वाअनेकवर्ण
षड्विधोदाहरणानिप्रदर्शयतिनत्रार्थयानेकवर्णसंकलनयोरुदाहरणमाह॥ यावत्तावत्कालकनीलकवर्णास्त्रिपंचसप्त
धनमिति॥ धनंत्रिपंचसप्तयावत्तावत्कालकनीलकवर्णाः क्षयंगेर्द्वौत्र्येकमितेस्तेः यावत्तावत्कालकनीलकवर्णैः सहिताः
कतिस्युः रहिताः कतिस्युरित्युदाहरणद्वयं॥ अत्रयावत्तावत्कालकनीलकवर्णानांभिन्नजातित्वात्॥ एथक्स्थितिरेव॥
या३ का५ नी७ एतेक्षयंगेर्द्वौत्र्येकमितैर्या२ का३ नी१ सहिताधनर्णयोरंतरमेवयोगइतियोगेतरंतेषुसमानजात्योरितिजा
ताः या१ का२ नी६ रहिताश्चेत्तदासंशेोध्यमानंस्वमूलंधनंभवतीतिधनत्वेसाजात्याद्योगे जाताः या५ का८ नी८॥ अथानेकवर्ण
गुणनादिचतुष्टयोदाहरणानिमंदाक्रांतयाह॥ यावत्तावत्त्रयमूलमूलमिति॥ स्फुटोर्थः॥ ऋणं यावत्तावत्त्रयं या३ ऋणंका
लकोः२ धनंनीलकः नी१ एतेरूपेणाद्याजातागुण्यः या३ का२ नी१ रू१ एतएवद्विगुणाजाताः गुणकः या६ का४ नी२ रू२ अ
यंगुणनार्थन्यासः | या६ का४ नी२ रू२ | या३ का२ नी१ रू१ | या३ का२ नी१ रू१ | या३ का२ नी१ रू१ | स्याद्रूपवर्णाभिहतोनुवर्णइत्यादिना | यात्व१८ याकाभा१२ यानीभा६ या६ याकाभा१२ काव८ कानीभा४ काव८ यानीभा६ कानीभा४ नीव२ नी२ या६ का४ नी२ रू२
गुणनेजातेपंक्तिच
अत्रयावद्वर्गानि
ष्टये गुणनफलं अक्षरतोंकनंच॥
यक्स्थितामधस्थितानांक्रमेणसा
जात्याद्योगेकालकवर्गादपितिर्यग्धस्थितानांकानिभा४ काव८ क्रमेणसाजात्याद्योगे
नीलकवर्गादपितिर्यग्धस्थितयोः नी२ साजात्याद्योगेन्येषांपृथक्स्थितोचजातेगुणनफलं॥ याव१८ याकाभा१२
यानीभा१२ या१२ काव८ कानीभा४ काव८ नीव२ नी४ रू२ अथेदंगुण्यभक्तंकिंस्यादिति॥ भागहारार्थंगुण्यछेद

स्यगुणनफलस्यन्यासः याव१८ याकाभा२४ यानिभा१२ या१६ काव८ कानीभा८ का८नी१२ नी४ रू२॥ याऽ काऽनी१ रू१ अत्र भाज्यच्छेदः शुध्यतिप्रच्युतः सन्नित्यादिलब्धेर्गत्या॥ अत्रभाज्येप्रथमतोऽष्टादशयावद्वर्गसंनि॥ भाजकेचयावत्त्रयंऽअस्मिन्यावत्षट्केनगुणितेऋणमष्टादशयावद्वर्गाभवंति॥ एतेयदाशोध्यंतेनदाधनंस्युरितिसाजात्याद्योगस्यान्नशुद्धिः॥ ऋणयावत्षट्केनचगुणितेनशुद्धिस्यात्॥ अतोनेनयाऽ हरोगुणितोजातः याव१८ याकाभा१२ यानीभाऽ याऽ अस्मिन्यथास्थानंभाज्यादपनीतेशेषंयाकाभा१२ यानिभाऽ याऽ काव८ कानीभाऽ काऽनीव२ नी४ रू२॥ याऽ काऽनी१ रू१ लब्धिश्चयाऽ॥ अथभाज्ययावत्कालकभावितमस्तिऋणकालकंऽ हरगुणनेनतस्यशुद्धिः स्यादितिलब्धिः काऽ एतद्गुणो भाजकोजातः याकाभा१२ काव८ कानीभाऽ काऽ अस्मिन्भाज्यादपनीतेशेषे॥ यानीभाऽ कानीभाऽ काऽनीव२ नी४ रू२ अत्रभाज्ययावन्नीलकभावितमस्तिनीलकहृयेनभाजकेगुणितेनतस्मादपनीतेसतिशुद्धिः स्यादितिलब्धिः नी२ एतद्गुणोभाजकः यानीभाऽ कानीभाऽनीव२ नी२ अस्मिन्भाज्यादपनीतेशेषे

याऽ	काऽ	नी२	रू२	
याऽ	काऽ	नी-	रू-	

अथभाज्ययावषड्रूपकमस्ति॥ हरेरूपद्वयगुणितेसतितस्यशुद्धिः स्यादितिलब्धिः रू२ रूपद्वयगुणितोहरः याऽ काऽनी२ रू२ अस्मिन्भाज्यादपनीतेसर्वशुद्धिरितिजानासंपूर्णालब्धिः याऽ काऽनी२ रू२ अथगुण्यस्यरूपंकथयेति॥ गुण्यस्यस्वेनगुणनार्थंन्यासः

याऽ	याऽ	काऽ	नी-	रू-
काऽ	याऽ	काऽ	नी-	रू-
नी-	याऽ	काऽ	नी-	रू-
रू-	याऽ	काऽ	नी-	रू-

भाऽ काव आदायेति उक्तवद्गुणनेयोगेचजातोवर्गः याव९ याकाभा१२ यानीभाऽ याऽ काव८ कानीनीव२ नी२ रू१ अथास्याःरूपेमूलंकथयेतिमूलोदाहरणं॥ अत्ररूपेभ्यःगृहीतानिपदानियाऽ काऽ नी१ रू१ अत्रद्वयोरभिहतिर्द्विर्निघ्नीयथाक्रमंस्थापिता याकाभा१२ यानीभाऽ याऽ इयंवर्गशेषाच्छोध्येतिमशोध्यमानेस्वमूलमेतीतियद्यपियावत्कालकभावितानीऋणत्वेधनर्णयोरंतरमेवयोगइतिभवतिशुद्धिः तथापियावन्नीलकभावितानांघातात्रूणत्वेसाजात्याद्योगे

द्वैगुण्यंस्यान्नशुद्धिः॥ अतोयावत्तावत्त्रयमूलंकल्प्यतेस्वमूलेधनर्णेइत्युक्तत्वात्॥ तथासतिद्वयोर्द्वयोरभिहतिर्द्विर्निघ्नीयाकाभा१२ यानीभाऽ याऽ अत्रयद्यपिसंशोध्यमानंस्वमूलत्वमेतीत्यादिनायावन्नीलकभावितानांयावतांचभवतिशुद्धिस्तथापियावत्कालकभावितानांनशुद्धिः तस्मात्पूर्वस्यामभिहतौयावन्नीलकभावितानांव्यत्यासार्थंनीलकरूपयोः ऋणत्वंकल्प्यमथवास्यामभिहतौयावत्कालकभावितानांव्यत्यासार्थंकालकस्यऋणत्वंकल्प्यमितिद्विधैवगतिरस्तितथासतिमूलान्येतानियाऽ काऽनी१ रू१ एतानियाऽ काऽ नी१ रू१ उभयेषामपिपरस्परंद्वयोर्द्वयोरभिहतिंद्विर्निघ्नींतुल्यैवयाकाभा१२ यानीभाऽ याऽ कानीभाऽ काऽ नी२ अस्याःशोध्यनेभवतिसर्वशुद्धिरितिद्वयस्यापिपदत्वंसिध्यं॥ दैवज्ञवर्यगणसंततसेव्यपार्श्वबल्लालसंज्ञगणकात्मजनिर्मितेऽस्मिन्॥ बीजक्रियाविवरणेकल्पलतावतारे वर्णोद्भवाःसमभवन्निति षट्प्रकारः॥ ॥इत्यव्यक्तषड्विधविवरणं॥ ॥२२०॥ अथकरणीषड्विधंव्याख्यायते॥ अत्रेदमवगंतव्यं॥ मूलराश्योर्वर्गद्वारायत्षड्विधमितिसंज्ञानुकरणीरावा चेतस्यगणितस्यावश्यकत्वाद्दृष्व्या॥ तत्रयस्यराशेर्मूलेपक्षिप्तेनिरग्रंमूलंनसंभवतिसकरणी॥ नत्वमूलदराशिमात्रं॥ तथासतिद्वित्रिपंचषडादिषुसर्वदाकरणीत्वव्यवहारस्यात्॥ अस्त्वसचेन्न॥ तथासतितत्प्रयुक्तंकार्यंस्यात्॥ यथा॥ अष्टौद्विसंयुताअष्टादशैवस्युरित्यादि॥ नन्वस्तुपरिभाषामात्रं॥ तथापिकिमनेनकरणीषड्विधनिरूपणश्रमेण॥ नह्यस्तिलोकेकरणीभिन्नंव्यवहारः॥ किंतुतदासन्नमूलैरेव॥ तत्षड्विधंरूपषड्विधेनैवगतार्थं किंचरूपेपिकरणीगणितेतनदासन्नमूलेनैवव्यवहारस्तदूरंप्रागेवनदादरइतिचेत्मैवं॥ प्रागेवस्थूलमूलग्रहेणतद्गुणादावतिस्थूलतास्यात्॥ रूपेपिसूक्ष्मेकरणीगणितेपश्चात्तदासन्नमूलग्रहेणकिंचिदेवांतरंस्यात्॥ नमहदित्यस्मिन्हानविशेषइतिकरणीषड्विधमवश्यमारंभणीयं॥ तच्चयद्यपिव्यक्तषड्विधांतरंगत्वात्पूर्वंषड्विधात्प्रागेवारब्धुं

युक्तेनथाप्येतस्यनिरूपणावगमयोःप्रयासगौरवात्सूत्रेकटाहन्यायेनवर्णषट्कधानंतरमप्यारंभोयुक्तएव॥तत्रतावद्द्विह
वल्लोपजातिकाभ्योप्रकारद्वयेनकरणीसंकलनव्यवकलनेगुणनभजनयोर्विशेषंचप्रतिपादयति॥योगेकरण्योर्मूलहरंतीप्र
कल्प्येति॥करण्योर्योगेंतरेवाकर्तव्येयःकरणीयोगःसामहतीकरणीतिकल्प्येत्करण्योर्घातमूलेद्विगुणंलघुश्चितिकल्प
येत्॥तयोर्लघुमहत्योःकल्पितकरण्योःरूपवत्कृतेयेयोगांतरेतेप्रथमकरण्योर्योगांतरेस्तः॥अथवाव्यक्तकरणीगुणनासु
चिंत्यइत्यादिनाभाज्याक्षरःशुध्यतिइत्यादिनाकरणीगुणनभजननयोःसिद्धावपितत्रविशेषमाह॥वर्गेणवर्ग्यगुणयेद्वर्जेत्रि
ति॥एतदुक्तंभवति॥करणीगुणकर्तव्ययदिरूपाणांगुण्यत्वंगुणकत्वंवास्यात्करणीभजनेकर्तव्येयदिरूपाणांभाज्यत्वंभा
जकत्वंतदारूपाणांवर्गंकृत्वागुणनभजनेकार्ये॥करण्यावर्गरूपत्वादिति॥वर्गस्यापिसमद्विघातनयागुणनविशेषत्वादुक्त
सिद्धिः॥स्याप्योत्यवर्गोद्विगुणोत्यनिघ्नइत्यादिनाव्यक्तेकप्रकारेणवाकरणीवर्गस्यापिसिद्धिस्यात्॥किंनुवर्गेणवर्गे
गुणयेद्वर्जेदित्यक्तवान्द्विगुणोत्यनिघ्नइत्यत्रचतुर्गुणोत्यनिघ्नोतिवक्तव्यं॥मूलज्ञानार्थंतुसूत्रंवक्ष्यति॥अथप्रकारो
नरे - लघ्येत्यादिनानिरूपयति॥लघ्याहतायामहत्याःकरण्याः यत्पदं॥तद्वेकत्रसंकेकंअपरत्रनिरेकमुभयमपिवर्गि
तंलघुकरणीगुणितंक्रमेणकरण्योर्योगांतरेस्तः॥अत्रलघ्यामहत्याःभागेयदिभिन्नंतास्यात्तदामूलंलाभेमूलंकार्थंयथा
संभवमवतोर्दृष्टव्यः॥अनयायुक्त्यामहत्याहतायाःलघ्याःपदेनरूपंयुतोनंवर्गितंचमहतीघ्नंयोगांतरेस्तःइतिज्ञेयं॥
अत्रकरण्योर्मध्येयाकनीयस्यलघुः॥योकनीयसीमहतीतिज्ञेयं॥ननुपूर्वसूत्रोक्ताकरण्योर्योगोमहतीघात
स्यमूलंद्विगुणंलघुरिति॥अत्रलघ्यामहत्येतिव्याख्येयं॥अथचमहत्यालघ्याइतिव्याख्येयं॥अन्यथाकरण्योःसाम्ये
अनेनसूत्रेणयोगांतरसिद्धिर्नस्यादिति॥अत्रद्वयोर्मध्येएकयाभक्तायाःपरकरण्याःपदस्यरूपेणयोगांतरयोर्वर्गी
भाजककरणीघ्नोयोगांतरेस्तइतिवक्तुंसाधीयः ननुपूर्वसूत्रेणघातस्यमूलमित्यत्रपदग्रहणमुक्तं॥द्वितीयसूत्रेल

घ्याहतायामहत्यास्तुपदमित्यत्रनदुक्तं॥तत्रयदिपदंनलभ्यतेतर्हियोगांतरेकथंकर्तव्येइत्यतआह॥एवकल्पिनिःस्या
द्यदिनास्तिमूलमितिस्पष्टोर्थः॥अत्रोदाहरणान्युपजातिकयाह॥द्विकाष्टमित्यस्मिन्भसंरव्ययोश्चेति॥स्पष्टोर्थः॥ प्रथमोदाह
रणेन्यासः॥क१ क८ अनयोर्योगोमहती १० करण्योर्घातमूलं४ द्विगुणं८ लघुक्रमेणलघुमहत्योर्न्यासः॥लक८ मक१० अनयो
र्योगांतरेरूपवत्कृतेर्१८।२ द्विकाष्टमित्योःकरण्योर्योगोष्टादश१८ अंतरंद्वयं२ योहिद्विकाष्टकयोर्मूलयोगःसएवाष्टादशानां
मूलं॥यत्तुद्विकाष्टकयोर्मूलांतरंतदेवद्विकमूलमित्यर्थः॥अथात्रद्वितीयसूत्रेणयोगांतरे॥लघ्याहतायामहत्या८ लब्धं
४ अस्यपदं२ सैकं३ निरेकं१ द्वयोरपिवर्गौ९।१ लघुघ्नोच१८।२ क्रमेणजातेतेयोगांतरे॥अथयुतिवर्गस्यचांतरंद्विघ्नघात
समानंस्यादित्यत्रतथाराश्योरंतरंवर्गेणद्विघ्नोघातःसमान्वितः॥वर्गयोगसमःसस्यादित्यत्राप्याकरएवस्फुटीभविष्य
तिविवरिष्यतेचास्माभिस्तत्रेवेतिनेहनिरूप्यते॥अथवर्गयोर्यएवमूलघातःसएवघातमूलमित्यत्रयुक्तिरुच्यते॥वर्गघाते
हिचतुर्घातःवर्गस्यसमद्विघातरूपत्वात्॥एवमेकस्यसमराशिद्वयस्येतरस्यचसमराशिद्वयस्यघानइतिचतुर्घातोचवर्गघा
तः यथारासी ३।९ अनयोर्वर्गघातार्थंघातवर्गार्थंराशिंचतुरस्येनभाज्ये ३।३।९।९अतोघातद्वयमेवे९।२९एवंवा१९।१९राश्यो
र्घातोरासिर्वर्गोवाअत्रवर्गे९।२९योर्घाते २२९घातयोर्वासमयो १९।१९ घाते २२९ पूर्वचतुष्कस्यघातोस्तिअतोवर्गघातस्यघात
वर्गस्यचभेदाद्यदेनघातवर्गस्यमूलंतदेवघातस्यापि॥तत्रघातवर्गस्यमूलंघातएवभवेदितिवर्गघातस्यापिमूलंघातए
व॥अतउपपन्नंयएवमूलघातःसएवघातमूलमिति॥अथद्वितीयसूत्रोपपत्तिः॥अत्रापिकरण्योर्मूलयुतिवर्गोमूलांतर
वर्गोवास्याध्योस्ति॥करण्यास्तुमूलंनलभ्यते॥अतःकरणीद्वयंतथापवर्तनीयंयथामूलंलभ्यतेनतथापरंमूलंलाभेतयोर्युति
वर्गोंतरेवर्गोवाकरण्यपवर्तनापवर्तनेतिःनस्यात्॥अनेनापवर्तितंकरण्यामूलंअपवर्तीकमूलेनापवर्तितंस्यात्॥एवंद्वितीय
करण्याअपितयोर्मूलयोर्युतिरपिअपवर्तमूलेनापवर्तितास्यात्॥युतेर्वर्गस्तुअपवर्तमूलवर्गेणापवर्तितःस्यात्॥अपवर्त

मूलवर्गस्वपवर्त्तएव॥ अतोयुतिवर्गोनरवर्गोवाअपवर्तोकेनगुणनीयइतियुक्तिरस्ति॥ अथापवर्तोविचारणीयः॥ करण्याः केनापवर्तनेमूललाभस्यादिति॥ तत्रकरण्यैकेनैवकरण्यपवर्तितारूपमेवस्यात्॥ तस्यचावश्येमूललाभः॥ तत्रयदिमहत्याकरण्याअपवर्त्तःक्रियतेतदालघ्याःकरण्याअपवर्तोनस्यात्॥ तच्चाचार्येणलघ्याकरण्याअपवर्तःकृतःतथासति। जातंलघुश्लोकेनरूपं॥ महत्यपिलघ्याअपवर्तीततोमूलंचग्राह्यं अतउक्तंलघ्याहतायास्तुपदंमहत्याइति॥ इदमपवर्तितमहत्याःपदं॥ अपवर्तितलघ्यास्तुरूपमेवपदं॥ अनयोर्युतावंतरेवाकर्तव्येमहतीपदंसैकंनिरेकंवाभवेत्॥ द्वितीयपदस्यरूपत्वात् अतउक्तंसैकंनिरेकमिति॥ एवंज्ञातामूलयुतिर्मूलांतरंचेति॥ अनयोर्वर्गोविधेयः॥ अतउक्तंस्वहतमिति॥ एवंज्ञातोयुतिवर्गोनरवर्गश्च॥ परमपवर्तितएव॥ अतोपवर्तनलघुकरण्याहृयमेतदुणनीयं॥ अतउक्तंलघुघ्नमिति॥ इदमुपलक्षणं॥ येनापवर्तेनकरण्योर्मूलेलभ्येतेतेनापवर्त्यकरण्यामूलेग्राह्ये॥ तयोर्युतिवर्गोनरवर्गोवा॥ पवर्तोकेनगुणितःसन्भवेद्येवकरण्योर्योगांतरंवेत्यादिसंधीभिरूह्यं॥ अथवर्गेणवर्गंगुणयेदूजेदित्यत्रोपपत्तिः॥ इहकरणीषट्कंधनंतन्मूलयोरेवषट्कंसाध्यते॥ यथाहिकाष्टमित्योःकरण्योर्योगस्यदृश्यत्वेसत्यपिमूलयोगार्थंतस्याष्टदशत्वमेवनिरूपितमित्यादि॥ तद्वदिहापिकरण्याद्यादिगुणत्वंतथासंपादनीयंयथातत्पदाद्यादिगुणंभवति॥ तत्राद्यादिभिरेवकरणीगुणनेतत्पदाद्यादिगुणंनभवतिकिंतुद्यादिवर्गेणतद्गुणनेयथाराशिः८ एतस्यद्विगुणत्वेभीप्सिते॥ चेदस्यवर्गो१६ द्विगुणःद्विगुणःक्रियते३२ तर्ह्यस्यमूलंद्विगुणोराशिर्नभवति॥ राशिः४॥ वर्गः१६ द्विवर्गेणगुणितेतु९४ तत्पदं८ भवतिद्विगुणोराशिः॥ एवंद्यादिगुणत्वेपिद्रष्टव्यं॥ अतउपपन्नंवर्गेणवर्गंगुणयेदिति॥ एवंभजनेप्युपपत्तिर्द्रष्टव्या॥ अस्तिचार्येणपाद्यामुक्तं॥ वर्गोरूनोघनविधौतुघनोविधेयोहारांशयोरपि पदेचपदमसिद्ध्येदिति॥ उपपादितंचास्माभिस्तद्व्याख्यानावसरे॥ अथगुणनेउदाहरणद्वयमुपजातिकयाह॥ द्वि

व्यएसंख्यागुणकः करण्योगुण्यस्त्रिसंख्याचसपंचरूपेति॥ अत्रपंचरूपसहितत्रिसंख्याकरणीगुण्यःगुणकस्तु द्विव्यएसंख्याः करण्यः पंचरूपोनेत्यर्कमितेकरण्यौवा॥ अत्रगुणद्वयादुदाहरणद्वयंज्ञेयं॥ अथप्रथमोदाहरणेन्यासः गुणकः क२ क३ क८ गुण्यः रू९ क२ वर्गेणवर्गंगुणयेदितिकरण्यावर्गरूपत्वात्॥ रूपाणामपिवर्गीकृतेजातोगुण्यः क२९ क३ यथारूढेःपृथग्गुणितःसहितश्चगुण्योगुणनफलंभवतियथारूढयोगेनापिगुणितोभवत्येवेतिप्रसिद्धं॥ अतोगुणकेद्विकाष्टमित्योःकरण्योर्योगेकृतेजातोगुणकः क१८ क३ गुण्यःपृथग्गुणकरूढसमोनिवेश्यइति गुणनार्थंन्यासः क१८ क२९ क३ गुणनेजाते४२० क५४ क७५ क९ करणीनवकस्यमूलंलभ्यतइतिमूलेगृहीते जातेगुणनफलं क३ क२५ क३ रू३ क४९ क५४ क७५ अथद्वितीयोदाहरणेन्यासः॥ गुणकः रू९ क१ क२ गुण्यः क२९ क३ अत्रगुणकेव्यर्कमितयोःकरण्योर्योगेजातं क२७ वर्गेणवर्गंगुणयेदितिरूपवर्गेकृतेज्ञेयं॥ तिःस्वपंचकमितिपंचविंशतिकरण्याःधनत्वेप्राप्तेविशेषमुपजातिकयाह॥ क्षयोभवेच्चक्षयरूपवर्गश्चेत्साध्यतेसोकरणीत्वहेतोरिति॥ क्षयरूपाणांवर्गस्तर्हिक्षयोभवेत् असौक्षयरूपवर्गश्चेत्करणीत्वनिमित्तंसाध्यते॥ नमूलंक्षयस्यास्तीत्यस्यापवादमाह॥ ऋणात्मिकायाइति॥ ऋणात्मिकायाःकरण्याःमूलंक्षयोभवेच्चेत्तर्हिमूलंरूपविधाननिमित्तंसाध्यतइति॥ अत्रोपपत्तिः॥ अत्रकिंकरूपवर्गःकरणीगुणनार्थंक्रियते॥ सयद्यपिधनमेवतथापितस्यमूलंरूपमेव॥ स्वमूलेधनर्णेइत्युक्तत्वात्॥ करणीयोगेनचमूलयुतिवर्गःसाध्यते॥ तत्रक्षयरूपवर्गःकरण्यायदिधनत्वेंकल्प्यते॥ तदान्ययाधनकरण्यासहयोगःस्यात्॥ तस्यचमूलंमूलयुतिरेव॥ भाव्यंचमूलांतरेणधनर्णयोरंतरमेवयोगइत्युक्तत्वात्॥ तस्मात्करण्याऋणसंज्ञामूलस्यबोधनार्थमेवकृता॥ बालावबोधार्थमिदमुदाह्रियते रू३ रू७ अनयोर्युतिः४ वर्गस्तावद्रा१६ सवकरण्याधनत्वेसतिनसिध्यति॥ यथाउदाहृतेयोरूपयोःकर

ण्यो क० क४९ योगेकरण्यार्महतीप्रकल्प्येत्यादिनाज्ञातोयोगः क१०० नल्पयेयुतिवर्गस्तस्माद्दृणत्वंकल्प्यतेतस्मा
द्दृंकरणीयोगादिकंनसाध्यतेतद्रूपक्षयरूपवर्गोधनमेव॥अत्रकरणीत्यपलक्षणं॥यत्रवर्गयोगात्करणीयोगव
तयुतिवर्गादिकंसाध्यतेतत्रक्षयरूपवर्गःक्षयएवकल्प्यः॥ इतीयमुद्देश्यमूलेभिनिविस्तरेण॥ प्रकृतमनुसराम॥
गुणकःरूपेक२क९२ करणीयोगः१७ रूपवर्गःक्षयःक२९एवंज्ञातोगुणकःक२९क२७ गुण्यःक२५क२३ गुणनार्थं
न्यासः क२५क२३॥क२५क२३ गुणनाज्ज्ञातंक५२५क६७५क८१क७५ प्रथमचतुर्थ्योःकरण्योर्मूलेरू२५रू९. अनयो
र्योगःरू१६ इतरकरण्योरंतरंक३०० एवंज्ञातंगुणनफलंरू१६क३०० अभजनोदाहरणे॥पूर्वगुणनफलस्यस्व
गुणच्छेदस्यन्यासः क० क२९ क७५ क५४ भाजकेदृष्टिकाष्टमित्योःकरण्योर्योगेज्ञातोभाजकःकरणीक१८ अथ
भाज्यच्छेदःशुध्यति क२ क३ क१८ इत्यादिनालब्धिर्ग्राह्याअत्रभाज्येप्रथमतःकरणीनवकमस्ति॥भाज्येत्रिगु
णितेतच्छुध्येदितिभाजकस्त्रिभिर्गुणितःक९क२४ अस्यशोधनेप्रथमचतुर्थ्योर्भाज्यकरण्योःशुद्धिःअतोलब्धेः
क३आभाज्यशेषेक४९० क७५पुनर्भाजकेपंचविंशतिगुणेक७५क४५०॥भाज्यशेषाद्यथासंभवमपनीतेशु
द्धिरस्तीतिज्ञातालब्धिःक२५एतस्यमूलंलभ्यतइतिगृहीतंमूलंरू५एवंज्ञातालब्धिःरू५क३अथद्वितीयो दा
हरणेभाज्यःक२५६क३०० भाजकःक२५क३क१२ करण्यार्योगेज्ञातोभाजकःक२५क२७अत्रपूर्वगुण्येनानेन
क३क२५लब्ध्याभाज्ये॥अतस्त्रिगुणोभाजकःसंशोध्यमानेस्वमृणत्वमेतीतिज्ञातःक७५क२७ अत्रभाज्यभाजकं
योरर्थनर्णकरण्योरंतरंनभवतिमूलाभावात्॥८१ अतोभाज्यभाजकधनकरण्योःक३०० क७५ऋणकरण्योश्च
क२५६क८१ योगेज्ञातंभाज्यःशेषक५७५क६२५ अस्माकेपंचविंशतिभाजकेक६२५ अपनीतेशुद्धिरस्तीतिज्ञा २१
तालब्धिःक३क२५ मूलेगृहीतेज्ञातालब्धिः॥त्रिसंख्यासपंचरूपेतिरू५क३॥ अत्रद्वितीयोदाहरणेभाजकः

कियद्गुणश्चेतिदुरवबोधत्वात्परमकारुणिकैरार्यैःशिष्यबोधार्थमुपायांतरमुपज्ञानिकाद्वयेननिरूप्यते॥
धनर्णतान्यत्वयमीप्सितायाश्छेदेकरण्यावसक्तद्विधाया॥तादृक्छिदाभाज्यहरौनिहन्याद्वैवयावत्करणीहरेस्या
त्॥१॥भाज्यासूयेति॥छेदर्द्धिप्सितायाःकरण्याधनर्णतान्यत्वयासंकल्पितादृशौनयथास्थितौभाज्यहरौगुणयेत्॥एवंकृते
करणीनांयथोक्तयायोगेनकृतेभाज्यभाजकौस्तः॥अथास्मिन्नपिभाजकेयद्विद्यारूपाणिकरणीखंडनिस्युस्तदाऽपि
एकस्याःकरण्याधनर्णताविपर्ययेसंकल्पितादृशौभाजकेनपूर्वंगुणसंपन्नौभाज्यभाजकौगुणयेत्॥तत्रापियथासंभवं
करणीयोगेकृतेतौभाज्यभाजकौस्तः॥एवमसकृत्तावद्विधेयंयावद्भाजकेएकैवकरणीस्यात्॥अथसंपन्नयाभाजक
करण्यासंपन्नभाज्यकरण्योरूपवदेवभाज्यः॥यल्लभ्यतेतालब्धिकरण्योभवति॥अथलब्धाःकरण्योर्योगज्ञाःस्यु
र्नपुनःप्रष्टुरभीप्सितास्तदावक्ष्यमाणविशेषसूत्रेणतथापृथक्कार्याः॥यथाप्रष्टुरभीप्सिताःस्युः॥द्वितीयोदाहरणेभा
ज्यःक२५६क३०० भाजकःक२५क२७ अत्रपंचविंशतिकरण्याऋणत्वव्यत्यासंकृत्वाज्ञातोहरः क२५क२७ अनेन
हरेणयथास्थितौभाज्यहरौगुणयेदितिगुणनार्थन्यासः क२५क२७॥ क२५६ क३०० | क२५ क२५ क २७ | भा
क२७ क२५ क २७ |
ज्यगुणितेज्ञातंक६४०० क७५०० क६९१२ क८१०० अत्रापिप्रथमचतुर्थ्यौद्वितीयतृतीययोश्चयोगेज्ञातंभाज्यक
रणीद्वयंक१०० क१२ भाजकेगुणितेज्ञातं क९२५ क६७५ क७२९ अत्रापिप्रथमचतुर्थ्यौद्वितीयतृतीययोश्चयोगे
ज्ञातंक४ क० एवंहरेज्ञातंकरण्येवक४ अनयाभाज्यकरण्योक१०० क१२ भक्तेलब्धिःक२५क२ एवंपूर्वोदाहर
णन्यासः भाज्यःक९क४५० क७५ क५४ भाजकःक१८।क३ अत्रछेदेत्रिमितकरण्याऋणत्वंप्रकल्प्यतादृशौछे
देनानेनक१८क३ भाज्यभाजकयोर्गुणनार्थंन्यासः॥क९क४५० क७५क५४ क१८क१८क३क१८ भाज्येगुणि
तेज्ञातंक१९२क८१०० क१३५० क९१२ क२७ क१क५० क२२५ क१४२ करण्योर्योगेनभक्तोलब्धिःक२५क३

तुर्थयं क८१०० क२२५ क९७२ क२७ अत्र प्रथमद्वितीययोस्तृतीयचतुर्थ्योश्च योगे जाते भाज्ये करणी द्वयं क५९२५ क५२५ एवं भाज्यके गुणिते जाते क३२४ क५४ क५४ क९ अत्रानयोः क५४ क५४ योगे जाता बुधिः इतरयोः ३२४ क९ योगे जाता करणी २२५ एवं हरकरण्यौ के वजाता क२२५ अनया भाज्यकरण्याहते लब्धिः करणी २५ क३ एवं लब्ध्या करणीयदियो ग जोरव्यान्तरादिश्लेषसूत्रेण पृथक्कार्यौ तत्रोदाहरणं॥ भाज्यः क९ क४५० क७५ क५४ भाजकः क२५ क३ अत्र भाजके निमित्तकरण्याकरणत्वं प्रकृत्यतादृग्दाहरणभाज्यहरयोर्गुणनार्थन्यासः

क२५	क९ क४५०	क७५	क५४
क३०	क९ क४५०	क७५	क५४ क३

क२५	क३		
क२५	क३		

भाज्यगणिते

क२२५	क११२५०	क१८७५	क१३५००
क९८७५अ	क२७	क९३५०	क२२५	क१६२

आस्वनयोः क२७ नयोश्च ११२५० क१६२ योगे जाते भाज्ये करणी द्वयं क१४५२ क८७१२॥ एवं हरगुणिते जाते क६२५ क७५ क७५ क९ अत्रापि तुल्ययोर्धनर्णकरण्योर्नाशे कृते परयोः क६२५ क९ योगे जाता एके वभाज्यकरणी क४८४ अनयोर्भाज्यकरण्योर्भजने जाता लब्धिः क१ क१८ अत्र द्वित्र्यष्टसंख्या गुणकः करण्यां गुण्यस्त्रिसंख्याचसंपञ्चरूपाअनयोर्वर्गोभाज्यत्वेनोदाहृतः॥ तयोरेकतरेणास्य भजनेऽन्यतरो लब्धिः स्यात्॥ प्रकृतेतु सपञ्चरूपयात्रिसंख्यया हियते अतो द्वित्र्यष्टकरणीभिः फलेनभाज्ये॥ उक्तरीत्यालब्धिः क१८ क२ एतन्मध्येद्वयं समीष्टं॥ इतरकरणीद्वयमपेक्षितं॥ अतइयं योगकरणी क१८ पृथक्कार्या॥ अतः पृथक्करणेवमेतन्निरूपयति॥ वर्गेणयोगकरणी विहृतावि शुध्येत्खंडानि तत्कृतिपदस्ययथेप्सितानि॥ कृत्वातदीयकृतयः खलुपूर्वलब्ध्या क्षुण्णा भवंति पृथगेवमिमाः करण्यः॥ वर्गकरणीयेन वर्गेण विहृतासती विशुध्येत्तत्कृतिपदस्ययथेप्सितानि खंडानि कृत्वातदीयकृतयः पूर्वलब्ध्या क्षुण्णाः पृथक्करण्यो भवंति॥ सा चासौ कृतिश्चेति कर्मधारयोद्रष्टव्यः॥ एतदुक्तं भवति॥ वर्गकरणीयेन वर्गेण विहृतासती निःशेषा भवेत्

२२

स्यवर्गस्यमूलंग्राह्यं॥ तस्यखंडानि प्रकृत्यीवंत्यभीष्टानि तावंति कृत्वातेषांखंडानांवर्गाः कर्तव्याः ते वर्गाः पूर्वलब्ध्याक्षुण्णाः वर्गेणहृतायांकरण्यांयालब्धिः सापूर्वलब्धिः तयागुणितास्तेवर्गाः पृथक्करण्यो भवंति॥ प्रकृतोदाहरणे योगकरणी क१८ इयमनेनवर्गेणविहृतासतीशुध्यतिलब्धिश्च २ वर्गस्यास्य पदं ३ अस्यखंडे १।२ अनयोर्वर्गौ १।४ पूर्वलब्ध्या २ गुणितौ २।८ जातेकरणीखंडे २।८ एवंपूर्वकरण्याक२ सहजाताद्वित्र्यष्टसंख्याजातालब्धिः २ करण्यः॥ एवं प्रकृत्यर्दिखंडद्वयमभीष्टेनस्यान्नहिवर्गपदस्यास्य २ खंडत्रयं १।१।१ एभ्यः पूर्ववत्करणीखंडानि २।२।२ एतासामपिकरणीनां योगेसैवकरणी भवति क१८ एवंप्रकृत्यृच्छावशादन्यान्यपिखंडानिकार्याणि॥ एवमन्यत्रापिद्रष्टव्यं॥ अथधनर्णतावत्ययमीप्सितायाइत्यत्रयुक्तिः॥ तुल्येनांकेनापवर्तितयोर्गुणितयोर्वाभाज्यभाजकयोः फलंवैषम्याभावइतितावत्प्रसिद्धं॥ तत्रकरणीयथेकाभवतितथाभाज्यभाजकौगुणनीयावापवर्तयेद्वा॥ तथासतिभजनेलाघवंस्यात्॥ तत्रापवर्तेविचारोऽयमास्ते॥ यथाभाजककरण्याःकेनापवर्त्यलतेएकेवस्यादितिविचारणीयं॥ पुनस्तेनांकेनभाज्यकरणीनामपवर्तनंसंभवतिनवेतिविचारणीयमिति॥ अतःकेनचिद्भाज्यभाजकौगुणनीयौनत्रभाजककृतेगुणःलघुतःतथासतिभाजकगुणनेवर्गत्वात्खंडवर्गैरखंडाभिहतिर्द्वयंवस्यात्॥ तत्रवर्गरूपयोः करणीखंडयोः मूलाभावदशयेतयोर्योगेएकेवकरणीस्यात्॥ परंखंडाभिहतिर्द्वयमवशिष्टंस्यात्॥ अतआचार्येणएकस्यागुणकंकरण्याधनर्णव्यत्यासउक्तः॥ तथासतिखंडवधयोर्मध्येएकस्यधनत्वमितरस्यर्णत्वमितियोर्योगेनाशस्यात्॥ एवंहरेत्वेकेवकरणीस्यात्॥ हरस्यगुणितत्वात्॥ भाज्यगुणनमावश्यकमित्यपपन्नं॥ धनर्णताव्यत्ययमित्यादि॥ एवंत्र्यादिखंडेष्वूह्यं॥ तत्रखंडबाहुल्यानुयुगपन्नाशेनभवतीत्यसकृदित्युक्तं॥ अथविश्लेषसूत्रोपपत्तिः॥ साचकरणीयोगद्वितीयसूत्रव्यत्यासेन॥ यथाकरण्योः करण्योर्वाकेनचिदपवर्त्यतन्मूलयुतिवर्गोपवर्तीकेनगुणितःसन्॥ योगकरणीभवति॥ तथाचयथायोगकरणीसासायुतिवर्गापवर्तीकेयोराहतिः अतःसावर्गेणविहृ

नाविशुध्येत्॥तच्चिह्नस्यपवर्गएवांकःस्यात्॥येनवर्गेणविहतावि शुध्येत्सयुतिवर्गएव॥तस्यपदंमूलंयुतिःस्यात्॥युतेःखंडानि
अपवर्तितकरणीनांमूलानिस्युः॥तेषांवर्गाःअपवर्तितकरण्यःस्युः॥एताअपवर्तितगुणिताःयथास्थितकरण्यःस्युः॥अपव
र्तोकरूपूर्वलब्धिरेव॥अतःसृष्टंवर्गेणयोगकरणीविहतावि शुध्येदित्यादि॥वर्गेस्थगुणनसूत्रेणैवोक्तत्वात्दुरुहरणानि
सात्रोपजातिकयाह॥द्विकत्रिपंचप्रमिताःकरण्यस्तासामिति॥स्पष्टोर्थः॥पूर्वोदाहरणेकरण्यः क२ क३ क५ वर्गस्यसमहिघात
रूपत्वात्अयमेवगुण्योगुणकश्चेतिगुणनार्थंन्यासः [क२ क३ क५ / क२ क३ क५ / क२ क३ क५] गुणनेजातं [क४ क६ क१० / क६ क९ क१५ / क१० क१५ क२५] अत्रसांक ४ क९
क२५ मूलानि।२।३।५। एषोयोगः रू१० अथन्यासांक ध्येदूयोर्दूयोस्तुल्य
योर्योगोजातश्चतुर्गुणाः करण्यः क२४ क४० क६० एवंजातोवर्गः रू१० क२४ क४० क६० अथवास्थाप्योत्सवर्गोद्विगुणोत्यनिघ्नाद्
त्यादिनावर्गोविधेयः॥तत्रकरणीवर्गेचतुर्गुणोत्यनिघ्नादितिबोध्यं॥वर्गेणवर्गगुणयेदित्युक्तत्वात्॥न्यासः क२ क३ क५ स्था
प्योत्सवर्गोद्विगुणोत्यनिघ्नाद्त्यादिनाजातानिवर्गखंडानि॥क४ क२४ क४० क९ क६० क२५ अत्रवर्गाणांमूलानिगृहीत्वा।२।३
९ ऐक्यंचकृत्वाजातोवर्गः रू१० क२४ क४० क६० अथद्वितीयोदाहरणेक२ क३ स्थाप्योत्सवर्गोद्विगुणोत्यनिघ्नाद्त्यादिनाक४
क२४ क९ वर्गमूलैक्यंकृत्वाजातोवर्गः रू९ क२४ अथतृतीयोदाहरणेन्यासः॥क५ क९ क२ क३ उक्तवज्जातो निवर्गखंडानिक
क२५ क१२० क४८ क७२ क२५ क४० क६० क४० क२४ क९ आसन्नवर्गरूपाभ्यः करणीभ्योमूलानिगृहीत्वायोगंचकृत्वाजातोवर्गः
रू१६ क१२० क४८ क७२ क४० क६० क२४ अथचतुर्थोदाहरणे न्यासः क१८ क८ क२ उक्तवज्जा तानिवर्गखंडानिक६४ क३२
क९७ क१४४ क६४ क२४ सर्वेषांवर्गरूपत्वात्जातानिमूलानि१८।१२।८।८।२ एषांयोगेजातोवर्गः रू७२ यद्यप्रथमलए
बलाघवार्थंकरणीयोगंकृत्वापश्चाद्वर्गः कार्यः॥क१८ क८ क२ द्विकाष्टमित्योर्योगः।क२८ पुनरस्याः क१८ पूर्वकरण्याः क१८
योगेजाताकरणी क७२ अस्यावर्गेजाताकरणी ५१८४ अस्याः मूलंजातोवर्गः रू७२ एवन्नुदाहृतकरणीनांखंडगुणितेजा

२३

पिवर्गाः साध्याः एवंखंडद्वयस्याभिहतिरित्यादिप्रकारद्वयेनापिवर्गाः साध्याः॥अथवर्गेदृष्टेकस्यायंवर्गइतिमूलज्ञानार्थंउ
पायमुपजातिकाद्वयेनाह॥वर्गेकरण्यायदिवाकरण्योस्तुल्यानिरूपा थवाबहूनां॥विशोधयेद्रूपकृतेःपदेनशेषस्यरूपाणि
युतोनानि॥एथकृन्नदत्तार्धंकरणीद्वयंस्यान्मूलेथबहूीकरणीत्योर्यो॥रूपाणितान्येवमतोपिभूयःशेषाःकरण्योयदिसंतिवर्गे॥वर्गे
करण्यास्तुल्यानिकरण्यो वातुल्यानिरूपाणिरूपकृतेःशोधयेत्॥अत्ररूपग्रहणंयोगवियोगयोर्योगंकरण्योर्महतीप्रकृत्यत्या
दिप्रकारस्यव्यावृत्त्यर्थं॥शेषस्यपदेनरूपाणिपृथग्युतोनानिकृत्वानदत्तार्धंकार्यं॥मूलेतत्करणीद्वयंभवति॥यदिपुनर्वर्गशेषाः
करण्यःसंतिनहितयोर्मूलकरण्योर्मध्येअल्पामूलकरणीयामहतीतानिरूपाणिप्रकृत्यअतोरूपेभ्योभूयोप्येवंकरणीतुल्या
निरूपाणिरूपकृतेर्विशोध्येदित्यादिनापुनरपिमूलकरणीद्वयंस्यात् पुन पियदिशेषाः करण्योभवेयुस्तदेवमेवपुनःकुर्यी
त्॥अत्रमहतीरूपाणीत्युपलक्षणं॥क्वचिन्महतीमूलकरणीअल्पानुरूपाणीत्यपिद्रष्टव्यं॥तेनक्वचिदल्पापीति॥अथपूर्वमि
श्रवर्गस्यमूलार्थंन्यासः रू१० क२४ क४० क६० अत्ररूपकृतेः१०० एककरणीरूपतुल्यरूपशोधनेशेषस्यपदाभावः करणीत्रि
तयतुल्यरूपाणिनशुध्यंतिअतःकरणीद्वयतुल्यरूपाणिशोध्यानि॥करणीद्वयंत्वभीष्टं॥इदंक२४ क४० इदंवाक२४ क६० इदंवा४०
क६० तत्रप्रथमकरणीद्वयंशोध्यमूलंसाध्यते॥रूपकृतेःकरणीद्वयक२४ क४० तुल्यरूपाणिविशोध्यशेषं ३९ अस्यपदं६ अने
नरूपाणि१० युतोनितानि१६।४ अर्धं८।२ वर्गेअन्यपिकरण्यपिक६० अतोमहतीमूलकरणीरूपाणि८ एषोवर्गः६४ अस्मा
च्छेषकरणीतुल्यरूपाणि६० विशोध्यशेषस्य ४ पदेन२ रूपाणि८ युतोनितानि१०।६ कृत्वाअर्धं५।३ एवंजातामूलकरण्यः क३
क२ क९ एवंद्वितीयतृतीयकरणीद्वययोःप्रथमशोधनेनापिएतावेवमूलकरण्यौभवंति॥अथद्वितीयोदाहरणेन्यासः रू९ क२४
रूपकृतेः२५ करणीतुल्यानिरूपाणि२४ विशोध्यशेषस्य ? मूलेन१ रूपाणि युतोनितानि६।४ तदर्धं३।२ जातेमूलकरण्यौक२
क३ अथतृतीयोदाहरणेन्यासः रू१६ क१२० क७२ क९० क४८ क४० क२४ रूपकृतेः२५६ करणीत्रितयस्यास्य १२० ७२ ४८

तुल्यानिरूपाणि विशोध्य शेषस्यास्य १६ पदेन ४ रूपाणि युतोनितानि २०।१२ तदर्धे १०।६ अनयोरल्पामूलकरणी क ९ महती रूपाणि १० एषां लब्धेः १०० करणीद्वयमपास्य २४।९० शेषस्य १६ पदेन ४ रूपाणि १० युतोनितानि १४।६ तदर्धे ७।३ अनयोरल्पा मूलकरणी महती रूपाणि एषां लब्धेः ४९ करणीतुल्यानि ४० रूपाणि अपास्य शेषस्य ९ पदेन ३ रूपाणि युतोनि १०।४ तदर्धे ५।१ जाते मूलकरणीयोः क ९ क २ एवं जाताः सर्वमूलकरण्यः क ९ क ३ क ५ क २ अथ चतुर्थोदाहरणे न्यासः॥ रू ७२ क० रूपलब्धेः ५।८४ क० करणी० विशोध्य शेषस्य ५।८४ पदेन ७२ रूपाणि युतोनितानि १४४।० तदर्धे ७२।० एवं जाता मूलकरणी ७२ ननु इयं लब्धिः रू ७२ अष्टादशाहतिकसंमिता नो करणी नो तत्कथमस्या मूलं द्विसप्तति करण्यृणिचेत्॥ उच्यते॥ इयं तासामेव युतिकरणी क ७२ अतः प्रतीत्यर्थं विश्लेषसूत्रेण पृथक्क्रियते॥ यथा॥ योगकरणी ७२ वर्गेणानेन ३६ विहृतालब्धिः २ कृतिपदे ६ पूर्ववद्व्यस्त्रयं मासीद्दिनिखंद्वयं लब्धं ३।२।१।० एषां लब्धयः ९।४।१ पूर्वलब्ध्या २ गुणिता जाताः पृथक्करण्यः १८।८।२ अत्रोपपत्तिः॥ वर्गस्तावद्वैभवति स्थाप्योत्यवर्गभ्यो नुर्गुणोत्यनिघ्नाद्यादिना॥ तत्र प्रथमस्थानेप्रथमकरणीवर्गः तत्र प्रथमकरणीद्वितीयादिकरणीघाताश्चतुर्गुणाः॥ ततोद्वितीयकरणीतृतीयादिकरणीघाताश्चतुर्गुणाः एवमन्येपि तृतीयादिकरणीवर्गादि॥ एवं यावन्तिकरणीखंडानि तावन्तमवश्यवर्गाः स्युः वर्गान्तेभ्यो वश्ये मूलत्राभः॥ तानि च मूलानि करणीतुल्यान्येव॥ तथा च वर्गराशौ योरूपगणः समूलकरणीयोगः॥ परंरूपपरीत्यानकरणीरीत्या॥ यदि तु करणीरीत्यैव करणीयोगो ज्ञायेत तदा वर्गेण योगकरणीविहृतावित्यादिना पृथक्करणं सुलभं भवेत्तु रूपपरीत्या करणीयोगइत्यन्यथा यतिनत्र्यं॥ तत्रेदं प्रसिध्यं॥ चतुर्गुणस्य घातस्य युतिवर्गस्य चोत्तरं॥ राश्यंतरकृतेस्तुल्यमिति॥ इदमेव वर्णमध्यमाहरणं मूलमेवस्फुटीभविष्यति॥ विवरिष्यते वास्माभिस्तत्रैव॥ अत्र तु यानिरूपाणि सकरणीयोगः अतोरूपवर्गः करणीयुतिवर्गे वर्गराशौ कानिचित्करणीखंडानि प्रथमकरणीद्वितीयादिकरणीघाताश्चतुर्गुणास्तेषां योगे प्रथमकरण्याः शेषकरणीयोगस्य चघातश्चतुर्गुणः स्यात्॥ युतिवर्गेपि प्रथम

२४

करण्यः शेषकरणीयोगराशेश्चाल्पिअतस्तयोरंतरे प्रथमकरण्याः शेषकरणीयोगस्य चोत्तरवर्गः स्यात्॥ अतउक्तवर्गे करण्या यदि का करण्यो रूपाण्यथवाबहूनो॥ विशोध्येद्रूपलब्धेरिति॥ एवं ज्ञातोंतरवर्गस्तस्य मूलं प्रथमकरण्याः शेषकरणीयोगस्य चोत्तरं रूपाणि तच्चुतयोरेव योगः॥ योगेंतरे च ज्ञाते योगोंतरेणोनयुतोर्धितइतिसंक्रमणसूत्रेण तयोर्ज्ञानं सुलभं॥ तदिदमुक्तं शेषस्य पदेन रूपाणि एथक्युतोनितानि तदर्धे करणीद्वयं स्यात्॥ इति ज्ञाता प्रथमकरणी अवशिष्टकरणीयोगश्च॥ यत्र मूलेकरणीद्वयमागते तत्रैकाया प्रथमकरणीकोवशेषकरणीयोगः तत्रकरणीयोगे महत्त्वस्यैककरण्यास्वल्पस्य चौचित्यात्लघुकरणीप्रथमामहतीं तु शेषकरणीयोगः॥ अथद्वितीयादिकरणीयोगात् द्वितीयकरणीतृतीयादिकरणीयोगाश्चतुर्गुणाश्चोक्तवद्द्वितीयकरणीपृथक्कार्या॥ अतउक्तवद्बहीकरणीतयोर्यी रूपाणितानीत्यत्रक्वचित्लघुकरणीरूपाणि॥ लघुकरण्याअपिशेषकरणीयोगत्वसंभवात्॥ यत्रैकाकरणीमहतीइतरकरणीखंडानिचातिलघुनिनशेषकरणीयोगः पूर्वकरण्यालघुरस्ति॥ अत्रप्रतीत्यर्थमुदाहरणं॥ क १३ क ७ क ३ क २ स्थाप्योत्यवर्गो द्विगुणोत्यनिघ्नाद्यादिनाज्ञातोवर्गः क १९३ क ३५४ क १५६ क १०४ क ४९ क ८४ क ५६ क ९ क २४ क ४ वर्गरूपाणां मूलानि १३।७।३।२ एषां योगः २५ एवं ज्ञातोवर्गः रू २५ क ३५४ क १५६ क १०४ क ८४ क ५६ क २४ अत्रैयरूपलब्धेः ९२५ अत्रचतुर्गुणोत्यनिघ्नाद्यादिनाचतुर्गुणप्रथमकरणीगुणियुतितेकरणीत्रितयमेवास्तीतिचतुर्गुणघातस्तत्रैवशोध्यं॥ अतोरूपलब्धेः ९२५ करणीत्रितयमेतदपास्य ३६४।९५।१०४ शेषस्यपदेन १ रूपाणि युतोनितानि २५।२४ अर्धे १३।१२ अत्रलघुः प्रथमकरणीतिवक्तुमनुचितंमुद्दाहृतकरणीषुतस्याअभावात्॥ नापिमहतीरूपाणीति॥ तस्याः शेषकरणीयोगत्वाभावात्॥ अतोलघुरेवरूपाणि १२ एषां लब्धेः १४४ उक्तवच्चतुर्घातरूपैः करणीद्वयमपास्य शेषस्य ४ पदेन २ रूपाणि युतोनितानि १४।१० अर्धे ७।५ अत्रापिपूर्ववन्महतीमूलकरणीलघ्वीरूपाणि एषां लब्धेः २५ करणीमपास्य २४ शेषस्यपदेन रूपाणि युतोनितानि ९।४ तदर्धे ३।२ एवं जाताः सर्वामूलकरण्याः क १३ क ७ क ३

क२तस्मान्महतीरूपाणीतिनियमः॥यत्तुमहतीरूपाणीत्युक्तंतद्बहूनामेवंसंख्यावाहुल्यस्योत्सर्गात्॥वस्तुतस्तु॥करणयाःप्राथमीकत्वंकात्स्न्यीकमितियेकरणीपृथक्कर्तुंशक्यतेसैवकायी॥तत्रलघुकरणीखंडानांशोधनेनलघुपृथक्भवति॥बृहत्खंडशोधनेनमहतीपृथग्भवति॥तत्रबृहत्खंडशोधनेनमहतीपृथग्भवतितथापिसाधिमूलेकरणीद्वयमध्येऽस्यानमहत्वनियमइतरकरणीयोगरूपायाद्वितीयमूलकरण्याअपिमहत्वसंभवात्॥लघुखंडशोधनेतुलघुःपृथग्भवतिसाधितकरणीद्वयमध्येप्यस्तितस्याःलघुत्वनियमः॥इतरकरणीरूपायाद्वितीयमूलकरण्यालघुत्वसंभवात्॥अतोलघुखंडकशोधनपूर्वकंमूलग्रहणेलघुर्मूलकरणीमहतीरूपाणीतिदृष्टव्यः॥बृहत्खंडशोधनपूर्वकेमूलग्रहणेत्वनियमः॥अथचमहतीरूपाणीत्यपलक्षणं॥तेनक्वचिदल्पापीतिप्रस्तुयोदाहृतेचत्वारिंशदशीतिद्विशतीतुल्याःकरण्यश्चेत्॥सप्तदशरूपयुतादितरवर्गेपितलघुखंडशोधनपूर्वकंमूलग्रहणेलघुर्मूलकरणीमहतीरूपाणीतिनियमस्यनभंगोस्ति॥तथाहि॥उदाहृतवर्गेन्यासः रू१७क४०क८०क२००अत्ररूपकृतेः२८९लघुकरणीद्वयं४०८०अपास्यशेषस्य१९९पदेन१३रूपाणि१७युतोनितानि३०।४।तदर्धे१५।२अत्रलघुमूलकरणी२महती१५रूपाणिएषांकृतेः२२५करणी२मपास्यशेषस्य२५मूलेन५रूपाणि१५युतोनितानि२०।१०तदर्धे१०।५एवंज्ञातामूलकरण्यस्तएवक१०क५क२अतःशिष्याणांगणितसौकर्यार्थंलघुखंडशोधनपूर्वकंमूलग्रहणमितिनियमोवक्तुमुचितःअन्यथालघुर्महतीवामूलकरणीतिन्याकुलतास्यादिति॥शोध्यकरणीनियमंत्वग्रेवक्ष्यति॥एकादिसंकलितकरणीखंडादीत्यादिवा॥अथयत्रवर्गराशावृणकरणीभवति॥तत्रमूलग्रहणेविशेषमुपजातिकयाह॥ऋणस्त्रिकोचेत्करणीलघोस्यात्धनात्मिकांतांपरिकल्प्यसाध्ये॥मूलेकरण्यावनयोरभीष्टाक्षयात्मिकेकासुधियावगम्या॥२०॥यदिवर्गेऋणात्मिकास्यात्तर्हितांधनात्मिकांपरिकल्प्यमूलेकरण्योःसाध्ये॥अनयोर्मूलकरण्योर्मध्येऽभीष्टाएककरणीसुधियाक्षयात्मिकाज्ञेया॥अत्रसुधियेतिहेतुगर्भमुक्तं॥तेनवर्गेयत्रैकेवक्षयकरणीभवतितदैवैकस्यामूलकरण्याक्षयत्वंयदिद्याद्

२५

दयोभवंतितदाएकस्याद्वयोर्बहूनांमूलकरणीनोयुक्त्यायथासंभवतितथाक्षयत्वंपरिकल्प्यं॥यत्रवर्गेसर्वाअपिधनकरण्यस्तत्रापिसर्वासामपिमूलकरणीनोपक्षेक्षयत्वमपिगंतव्यमिति॥अत्रोपपत्तिः॥यएवऋणकरणीवर्गःसएवधनकरणीवर्गःपरमृणकरणीवर्गकरण्यृणात्मिकापरत्रधनात्मिकेत्येवविशेषःतथासतिवर्गेकरणीऋणात्मिकाधनात्मिकावाभवतुमूलंत्वंकतःसमभेदोचितं॥उक्तविधिनारूपकृतेःक्षयकरणीश्रुत्योर्युतौशोध्यमानेऋणंधनंस्यादितियोगएवस्यात्॥रूपवर्गीधनकरणीषुसंशोध्यमानेस्वमृणंस्यादित्येतरः॥अंतरेत्वमूलोक्तसिद्धिरुक्तैव॥अतोधनात्मिकांतांपरिकल्प्येत्युक्तं॥परमेवंधनवर्गस्थेवपदंस्यात्॥अनउक्तंक्षयात्मिकेकेति॥अत्रोदाहरणानिसाधोपजातिकयाह॥त्रिसप्तमित्योरिति॥अत्रमूलग्रहणेएवंविशेषोकेर्यद्यपिस्त्वंवर्गमुद्दिश्यमूलप्रश्नएवोचितस्तथापियदिकश्चिद्ब्रूयात्वर्गेक्षयकरणीनसंभवत्येवतंप्रतित्रिसप्तमित्योर्विश्लेषेवर्गंबूहीत्यादिप्रश्नोद्रष्टव्यः॥शेषंस्पष्टं॥न्यासःक३क७वान्यासःक७क३अनयोर्वर्गःसमएवरू१०क८४अत्रवर्गेऋणकरण्यायथास्थितत्वेउक्तवर्गपदाभावः॥तथाहि॥रूपकृतेः१००करणीमपास्यशेषं१८४अस्यपदाभावान्नोक्तवन्मूलसिद्धिः॥अतःक्षयकरणीधनात्मिकांतांपरिकल्प्यमूलेयात्यंतथासतिरूपकृतेः१००करणीमपास्यशेषं१६अस्यपदेन४रूपाणियुतोनितानि१४।६अर्धे७।३जातेमूलकरण्यौक७क३अनयोरेकाअभीष्टाक्षयात्मिकेतिजातेमूलकरण्यौक७क३वाक७क३॥अथद्वितीयोदाहरणेन्यासःक२क३क५अस्यधनर्णत्वेनतत्तीयोदाहरणेन्यासःक२क३क५अनयोःपक्षयोर्जातोवर्गःसमएवरूप१०क२४क४०क६०अत्राप्यृणत्वंयथास्थितेउक्तवन्मूलाभावः॥तस्मादृणात्मिकाचेत्करणीलघोस्यात्धनात्मिकांतांपरिकल्प्यसाध्येइतिलघुतेकरण्योरुक्तत्वान्मूलरूपाणि४०।८रूपकृतेः१००शेषं०अस्यपदेनरूपाणियुतोनितानि१०।१०अर्धे५।५अनयोरेकस्यामूलंअवशेषंकल्प्यंअन्यावर्गेक्षयकरणीनस्यादितितत्रमूलकरण्याःक्षयत्वमितरस्याधनत्वंचप्रकल्प्यतावदुदाहरणंलिख्यते॥क५रयेमूलकरणीशेषकरणीरूपाणि५एषांकृतेः२५करणीमपास्यशेषस्यपदेन१रूपाणियुतोनितानि६।४अर्धे३।२

ज्ञातेमूलकरण्योक१क२अत्रोक्तयोर्धनत्वमेवयुक्तं॥एकस्याऋणत्वेवर्गेशेषकरण्याः क२४धनत्वेनस्यात्॥नयोश्चतुर्गुणघाता
न्मकत्वात्॥अस्माउभयोःक्षयत्वेयद्यपिशेषकरण्याः संभवतितथापिपूर्वकरण्योःक्षयत्वंनस्यात्पूर्वमूलकरण्याः क२०गुणि
तयोरेतयोर्मूलकरण्योः क३क२तथात्वात्क४०क८०एवंज्ञातंपदंक९क३क२अथमूलकरण्याधनत्वंप्रकल्प्योदाहरणे॥मूल
करणीक९शेषं९रूपाणिरूपक्षतेः२९शेषकरणीमपास्यपूर्ववज्ज्ञातेमूलकरण्योक३क२अत्रोभयोःक्षयत्वमेवयुक्तं॥एकस्या
एवक्षयत्वेउक्तयुक्त्याशेषकरण्याक२४धनत्वंनस्यात्॥उभयोर्धनत्वेउक्तयुक्त्यापूर्वयुक्त्यापूर्वकरण्याः ४०।८०क्षयत्वंनस्या
त्॥एवंज्ञातंपदंक९क३क२तस्मादुक्तंसुधियेति॥एवमनयोःक२४क४०अनयोर्वीक२४क८२प्रथमतःशोधनेनापिपदद्वयंदृ
श्यं॥नत्वृणकरण्याधनत्वकरण्याधनत्वकल्पनंविनेवास्मिन्मूलसिद्धिः॥तथाहि॥क२क३क९वाक२क३क९रूपाण्येत्यव
र्गीत्यादिनाज्ञातोवर्गः क४क२४क४०क९क९०क२५स्वमूलेधनर्णेइतिवर्गकरणी नोमूलानिरू२रू३रू९वारू२रू३रू९
उभयेषामपियोगःसमएवरू०एवंज्ञातोवर्गःरू०क२४क४०क९०अत्ररूपक्षतेः०करणीद्वयक२४क४०मपास्य१९पदेन४रू
पाणि०युतोनितानि४।४अर्धं२।२एकामूलकरणीक२अपरा२रूपाणिएतत्क्षतेः४शेषकरणीक९०मपास्यशेषस्य९४पदं
न८रूपाणियुतोनितानि८।१०अर्धं५ज्ञातामूलकरण्यः क२क३क९अथयदिपरामूलकरणीक२आद्याक२रूपाणिए
तत्क्षतेः४शेषकरणी९०मपास्यशेषस्य९४पदेन२रूपाणि२युतोनितानि१०।८अर्धं५।३एवंज्ञामूलकरण्यः क२क३क९
अथवारूपक्षतेः०करणीद्वयक४०क९०मपास्यशेषस्य१००पदेन१०रूपाणियुतोनितानि१०।१०अर्धं५।५अनयोराद्यामू
लकरणीक९परारूपाणि५एतत्क्षतेः२५शेषकरणीमपास्य२४शेषस्यपदेन१रूपाणियुतोनितानि४।६अर्धं२।३एवं
ज्ञातामूलकरण्यः क९क२क३अथयदिपरामूलकरणीक९आद्या९रूपाणिएतत्क्षतेःशेषकरणीमपास्य२४शेषस्य१ २५
पदेन१रूपाणियुतोनितानि६।४अर्धं३।२एवंज्ञातामूलकरण्यः क९क३क२एवमनयोरपिक२४।क९०शोधनेपद

येदृश्यं॥एवंवर्गकरण्याधनत्वकल्पनंविनैवमूलसिद्धावपिस्वयमशुद्धवर्गंकृत्वानस्योक्तवन्मूलंज्ञायतीतिऋणात्मि
काचेत्करणीकृतोस्याःधनात्मिकांनोपरिकल्प्यसाध्येइतिविशेषमभिधायपुनर्मूलकरणीनोसाध्येक्षयत्वकल्पनेःबुगमा
भावात्सुधियेत्यादियदुक्तंतदयुक्तंविशेषज्ञानोआचार्योणइतिचेत्॥उच्यते॥विस्मृतगुरुरसस्यपिनोपहतरसनस्यगुरुभक्ष
यतस्तिक्तरसमनुभवतोदेवदत्तस्यमधुरोयंगुडइतियथार्थवादिनिसर्वेतेपियथाभ्रांतत्वंनिश्चयस्तथाचार्येनवापिसयुक्तएव॥
ननुतत्कथमिदमनुगंतव्यं॥शृणुतर्हि॥एतान्हिमूलकरण्यः क२क३क५एतावाक२क३क५एतासामासन्नमूलानिगृहीत्वाक्षते
क्षेचक्षत्वाक्षतेवर्गकरणीनोएतावादौवर्गंकृत्वापश्चात्तासन्नंमूलानिगृहीत्वाक्षतेयोगेतुल्यःतथैवभाव्यं॥करणीषट्विंशस्यमू
लषड्विधार्थेप्रक्षतेःअन्यथायोगेकरण्योरित्यादिनाक्षतःकरणीयोगोनोपपद्यतेतत्रासामासन्नमूलानि[illegible]
एषांयोगोधनं०।५५ऋणंवा०।५५अनयोर्वर्गस्तुल्यएव०।५०धनं॥अथाचार्यैःप्रथमतःक्षतस्यकरणीवर्गःसयास्यरू१०क२४
क४०क५२करणीनामासन्नमूलानि[illegible]रूपेषुसंयोज्यज्ञातोवर्गःसएव०।५०अथयदिक्षतस्यरू०क२४क४०क५२
आसन्नमूलानांतेषामेवयोगःक्रियतेतदास्यात्९अयमशुद्धोवर्गः॥ऋणत्वादन्यशुद्धिः॥नत्वृणेवर्गःसंभवतीतिनिरूपि
तंनमूलंक्षयस्यास्तीतिनस्याःकृतित्वात्॥अथयदिमूलस्यसावयवत्वादस्मिन्वर्गेतवनस्फुटाप्रतीतिरस्तिनहीदमुदाहर
णे॥रू३।रू७एषांयोगस्यरू४वर्गणानेनरू१८भाव्यं॥अथात्रक्षतदुक्तरीत्यायदिकरणीवर्गःक्रियतेनदेतावान्नभवति॥तथाहि॥
क९क४९अत्रस्थाप्योत्थवर्गइत्यादिनाज्ञातोवर्गः क८१क१७५४क२४०१अत्राचार्योक्तमार्गेणमूलानिरू९रू४९रू४२एषां
योगेभवतिवर्गएव१९क्षतदुक्तामार्गेणमूलंग्रहणेज्ञानिमूलानिरू९रू४९रू४२एषांयोगःरू८२नत्वयंवर्गः संभवति॥ननु
स्वमूलेधनर्णइत्यस्यकागतिःशृणुतर्हिमूलंग्रहणेस्वमूलेधनर्णइत्युक्तं॥प्रक्षतेतुकरणीवर्गेकरणीजातिर्नरूपजातिर्नेवनस्था
पनमस्तिननुमूलंगृह्यतइतिअतएवप्रक्षतेषापिरूपेषुकरणीवर्गइत्येवंव्यवहारोस्तिननुकरणीवर्गोमूलमिति॥एवंरू

पाणामपि करणीजातिलेनस्थापने करण्य एवस्थाप्यंतेवर्गविधानेतुक्षयत्वंकथंस्यात्॥तस्माद्रूपकरण्योभिन्नजातित्वप्रयुक्तः
संख्याभेदोनतुवास्तवः॥यथावराटजात्याविंशतिकरणीजात्याएकः१पणजात्याचतुर्थांशो २ इम्मजात्याचतुःषष्ठ्यंशः २४
स्थाप्यते॥नस्यासांसंख्यानांफलतोभेदोस्ति अतएवरूपत्रयस्यकरणीनवकस्यवावर्गोरूपनवकमेव॥रूपकरण्योःफलतो
भेदःसमएववर्गःकथंस्यात्॥तस्मात्सृष्टंकरणात्मिकाचेत्करणीफलतोस्यादिति॥ननुमूलकरणीनोक्षयत्वकल्पनेकोनु
गमःभृगु॥वर्गेकरणीहतयेकरणीद्वितयस्यतुल्यरूपाणीत्यादिवक्ष्यमाणप्रकारेणशोध्यकरणीनोविनिमयतासाधनत्वमे
वप्रकल्प्यतथाचतुर्गुणयायथास्थितधनर्णताकाःशोधितकरण्याभाज्याःभजनेयादृशकरण्योधनमृणंवालभ्येनेतादृशाःशे
षकरण्योहेयाःइत्यादिमतिमद्भिरप्यूह्यमकंपत्रूविनेन॥अथवर्गेकरण्यायदिवाकरण्योइत्यादिकेरनियमेनकरणीशोधि
तेसतिमूलाघुधिःस्यादितिकरणीवर्गेकरणीसंख्यानियमपूर्वकशोध्यकरणीनियमंगीतिहूयेनआर्याद्वितयेनचनिरूपय
ति॥एकादिसंकलितमितकरणीखंडानिवर्गीराशौस्युरिति॥२४॥अत्रद्वितीयपादोतिथिंषुपंचानामितिबहवःपठंतितत्रति
थिंषुपंचानामितिपठनीयंअन्यथाछंदोभंगएव॥अत्रैकादिसंकलितमितकरणीखंडानिवर्गीराशौस्युरित्यनेनएककरण्या
वर्गएवाकरणीहूयोःकरण्योवर्गेकरणीत्रितयंस्यादित्यादिनिरूपितंतद्बह्वप्रत्यक्षविरुद्धमतःस्वयमेवतदर्थंविवृणोतिकरणी
वर्गीराशौरूपैरवश्यंभवितव्यं॥एककरण्यावर्गेरूपाण्येव॥द्वयोःसरूपैकाकरणीतिस्रणांतिस्रश्चतस्रणांषट्पंचानांदश
षण्णांपंचदशानांतुद्यादीनांकरणीनांवर्गेषुएकादिसंकलितमितकरणीखंडानियथाक्रमंस्युः॥यथा यच्चुद्दाहरणे
तावंतिनभवंतितदासंयोज्ययोगकरणीविश्लेष्यवातावंतिरूपाणिमूलेग्राह्यमित्यर्थः"वर्गेकरणीत्रितयेकरणीद्वितयस्य
तुल्यरूपाणीत्यादिस्फुटार्थमिति॥अत्रकरणीवर्गीराशौरूपैरवश्यंभवितव्यं॥एककरण्यावर्गेरूपाण्येव॥द्वयोःसरूपै
केति॥आर्यांकल्पयित्वासूत्रमध्येपठंतिनदश्रुत्यं॥करणीतिस्रणांतिस्रइत्यादेरग्रिमग्रंथस्यानन्वयात्॥नस्येकमेव २७

चाक्यश्लोककर्णात्मकमितिशेषितरत्र॥शेषंकिंचिन्नयाख्यायते॥उत्पत्स्यमानयेति॥अत्रोत्पत्स्येत्युपलक्षणं॥अत्रम
हतीमूलकरणीअल्पारूपाणिनत्रमहत्याचतुर्गुणयायासामपवर्तःस्यात्तदाएशोध्याः॥आचार्यमतेत्वल्पंपरिभाषिकं॥यतोस्यसू
त्रस्योदाहरणयामूलकरणीरूपाणिप्रकल्प्यान्येकरणीखंडेसाध्येतेसामहतीत्यर्थइतिव्याकरिष्यति॥पुनर्नियममाह॥अपव
र्तनइति॥अल्पयाक्वचिन्महत्यावाचतुर्गुणयापवर्तेरुतेयाकरण्योलब्धास्ताएवमूलकरण्योभवंतीतिवस्तुस्थितिः॥अथ
यदिशेषविधिजामूलेथबह्वीकरणीनयोर्येत्यादिनातायदिनभवंतितन्मूलमसदिति॥अत्रोत्पत्येत्युपलक्षणमितियद्व्या
ख्यातंतद्दूरंखंडशोधनपूर्वकंमूलग्रहणेलघुसंरशोधनपूर्वकंमूलग्रहणेअल्पयेत्येव॥अशोपपत्तिः॥यत्रैकैवकरणीत
त्रस्थाप्योत्यवर्गइतिवर्गएवस्यात्॥तस्यचमूलाभावाद्रूपाण्येवस्युः॥यत्रकरणीद्वयंतत्रस्थाप्योत्यवर्गइतिएककरण्यावर्गः
तदुत्तरंचतुर्गुणांत्यनिघ्नाइतिएकेचचतुर्गुणांत्यनिघ्नातिएवंयत्रकरणीत्रयंतत्रस्थाप्योत्यवर्गइतिएककरण्यावर्गः तदुत्तरं
चतुर्गुणांत्यानिघ्नाइतिशेषकरणीद्वयंचतुर्गुणांत्यनिघ्नंततोंत्यंत्यकेतिशेषंकरणीद्वयं॥तत्रापिस्थाप्योत्यवर्गइतिद्वितीयक
रण्यावर्गः॥चतुर्गुणांत्यनिघ्नीचापरा॥एवंयत्रकरणीषट्कंतत्रस्थाप्योत्यवर्गइतिप्रथमकरण्यावर्गः ततःपंचकरण्याश्चतु
र्गुणांत्यनिघ्न्यःइतिपंचकरणीखंडानि॥पुनरंत्यंत्यागेद्वितीयकरणीवर्गःशेषाश्चतस्रश्चतुर्गुणांत्यनिघ्न्यइतिचतस्रिखंडानि
पुनरंत्यंत्यागेततोयकरण्यावर्गःशेषास्तिस्रश्चतुर्गुणांत्यनिघ्न्यइतित्रीणिखंडानिपुनरंत्यंत्यागेचतुर्थकरण्यावर्गःत
तःशेषकरणीद्वयंचतुर्गुणांत्यनिघ्नमितिखंडद्वयंपुनरंत्यंत्यागेपंचमकरण्यावर्गशेषाकरणीचतुर्गुणांत्यनिघ्नीयेकंखंडंपुनरंत्य
मेकाषष्ठ्यावर्गः॥एवंवर्गेजातेषण्णामपिकरणीनांवर्गः॥ तेषांमूलानिमूलकरणीतुल्यानिरूपाणिस्युःअतस्तेषांयोगो
करणीवर्गेरूपाणि॥खंडानितुप्रथमंपंचतनश्चत्वारितनस्त्रीणिततोद्वितनएकमितिव्यस्तमेकोयेकोत्तराणिभवंति॥तस्मा
देकोनकलसंकलितमितकरणीखंडानिभवंतिप्रथमखंडस्यवर्गत्ववस्थापनात्॥अतोद्व्यादीनांवर्गेएकादिसंकलित

नमिनकरणीखंडानीत्यर्थः॥अनयैवयुक्त्यावर्गकरणीत्रितयइत्यादिबोध्यं॥यतोरूपाणिकरणीयोगः॥तस्यवर्गोयुतिवर्गः॥तत्रप्रथमकरण्याःपृथक्करणेप्रथमकरणीशेषकरणीघातश्चतुर्गुणःशोध्योनरवर्गार्धंअत्रयुक्तिःप्रागेवोक्ता॥अतःषण्णांकरणीनांवर्गेप्रथमकरण्याःपृथक्करणेप्रथमकरणीशेषकरणीपंचकघातश्चतुर्गुणोनरवर्गार्धंशोध्योभवतिइतिकरणीषट्कवर्गेपंचेचकरण्यःशोध्याः॥तदिदमुक्तंनिधिपंचानामितिं॥यतःकरणीषट्कवर्गेपंचदशैवकरणीखंडानिभवंति॥एवंकरणीपंचकवर्गेप्रथमकरण्याःपृथक्करणेप्रथमकरणीशेषकरणीचतुष्टयघातश्चतुर्गुणःशोध्यइतिचतस्रएवकरण्यःशोध्याःतदिदमुक्तं॥दशसूक्तचतस्रणामितिं॥एवंकरणीषट्केनिरूपणंवर्गेकरणीत्रितयेकरणीद्वितयस्यतुल्यरूपाणीत्यादिपूर्ववदेवबोध्यं॥एवमपियदाकेनचिद्धेष्टेनउक्तनियमेनपूर्वंकथंयथामूलमायातितथारूपाणिकरणीश्चकल्पयित्वाथादिष्टेनतत्तद्दृष्टान्तेनतत्तद्दृष्टान्तरेणवेतिज्ञानार्थंमुक्तमत्स्यौचतुर्गुणयायासामपवर्तनःस्यादितिं॥अत्रात्मयेतिप्रथमकरणीलक्ष्यतेयतःप्रथमकरणीशेषकरणीघातश्चतुर्गुणःशोध्यतेतोयाशोधितास्तासामाद्यायाचतुर्गुणयायाःपवर्तनःस्यादेव॥यद्यपपवर्तोनस्यानदोदाहरणस्यखिलंस्फुटमेव॥अथयदिधृष्टतरेणप्रथमशोध्यकरण्यस्ताएवनाहशोन्यावास्थापिताःपरंतस्याःकाश्चनयुक्त्यास्थापिताःतदातत्तद्दृष्टान्तस्यखिलत्वंखिलत्वंज्ञानार्थमुक्तमपवर्तेयालब्ध्याइत्यादि॥यतश्चतुर्गुणांत्यनिघ्नाइत्यत्रचतुर्गुणप्रथमकरणीशेषकरणीघातोस्ति॥तत्रचतुर्गुणप्रथमकरण्याअपवर्तेमूलकरण्यएवलब्ध्याइतिमूलकरण्योपवर्तीदेवज्ञानात्॥यत्तुशेषविधिनानानभवंतितदाशेषकरणीनोदुष्टत्वात्तदुत्पन्नमूलकमपिदुष्टमित्यपपन्नं॥अथवर्गेकरणीत्रितयेइत्यादिनियमंविनामूलग्रहणंमूलासत्वमित्यत्रोदाहरणमाययाह॥वर्गेयत्रकरण्योदंतैःसिंधुर्जैर्भिन्नाविद्वन्॥रूपैर्दशाभिरूपेनाकिंमूलंब्रूहितस्यस्यात्॥स्पष्टोर्थः॥न्यासः रू१० क२२ क२४ क८ अत्रवर्गेकरण्याइत्यादिनैवमूलग्रहणंत्रितयशोधनेविनाशेषस्यदोषाभावात्॥रूपक्षेपैः१०० करणीत्रयतुल्यरूपाणिविशोध्यशेषस्य५पदेन५रूपाणियुतोनितानि१६।४तदर्धंजातेमूलकरण्योक८ क२तदिदंपदमसत्॥

२८

यतोस्यवर्गोयंरू१० क६४ अतउक्तंवर्गेकरणीत्रितयेकरणीद्वितयस्यतुल्यरूपाणीत्यादि॥एवंयेषांकरणीखंडानांयोगेरूपक्षेपेशोधितेशेषपदंलभ्यतेतादृशानिकरणीखंडानिकल्पयित्वोदाहरणानिदृष्टव्यानि॥अथवर्गेकरणीत्रितयइत्यादिनियमेनापिमूलग्रहणेऽग्निमनियमंविनामूलंदुष्टमित्यत्रोदाहरणमार्यायाह॥वर्गेयत्रकरण्यस्त्रिथिविश्वहुताशनेश्चतुर्गुणितेः॥तुल्यादृशरूपाढ्याःकिंमूलंब्रूहितस्यस्यात्॥स्पष्टोर्थः॥न्यासः रू१० क६० क२२ क१२ रूपक्षेपैः१०० उक्तनियमेनकरणीद्वयं२२।१२ मपास्यशेषस्य३६पदेन६रूपाणियुतोनितानि१६।४तदर्धं८।२ अनयोरल्पामूलकरणी२महतीरूपाणि८तक्षेपैः६४ करणी६० मपास्यशेषस्य४पदेन२रूपाणि८युतोनितानि१०।६तदर्धं५।३ एवंजातंमूलं क२ क३ क५तदिदमसत्॥यतोस्यवर्गोयं रू१० क२४ क४० क६०अतउक्तमल्पयाचतुर्गुणयायासामपवर्तःस्यादिति॥अत्रात्मया२चतुर्गुणया८शोधितकरण्यो५२ क१२रपवर्तोनभवतीत्यशुद्धंपदं॥एवमपिमूलग्रहणेयिमनियमाभावेमूलमसदित्यत्रोदाहरणमार्यायाह॥अष्टौषट्पंचाशत्षष्टिःकरणीत्रयंकृतौयत्ररूपैर्दशाभिरूपैस्तैःकिंमूलंब्रूहितस्यस्यात्॥अत्रकरणीत्रितयंकृतौयत्रेतिपठंतितदशुद्धं॥मात्रंधिक्येनछंदोभंगात्॥स्फुटोर्थः॥न्यासः रू१० क८ क५६ क६० अत्रकरणीत्रितयेकरणीद्वितयस्येतिनियमात्करणीद्वयं॥५६ शोधनेनमूलकरण्यो८।२ अत्रात्मयाचतुर्गुणया८शोधितकरण्योरपवर्तः॥संभवतीतिअल्पामूलकरणी२महतीरूपाणि८पुनरेतेभ्यउक्तवज्ज्ञानंकरणीद्वयं५।३ अत्रात्मयाचतुर्गुणयाशोधितकरण्याः६अपवर्तःसंभवतीतिज्ञातंमूलं क२ क३ क५तदिदमप्यसत्॥यतोस्यवर्गोयंरू१० क२४ क४० क६०अतउक्तंअपवर्तेयालब्ध्याइत्यादि॥अत्रात्मयाचतुर्गुणया८शोधितकरण्यो८।५६ रपवर्तेनलब्धे१।१७ शेषविधिनालब्धेमूलकरण्यो५।३॥अथवर्गेषट्प्रभृतिषुकरणीखंडेष्वेवमेवेतिन्यासिंप्रदर्शयितुंउपजातिकयोदाहरणमाह॥चतुर्गुणाःसूर्यतिथीषुरुद्रनागर्तवोयत्रकृतौकरण्यः॥सविश्वरूपावदतंपदंतेयत्रस्तिबीजेपटुताभिमानः॥९॥अत्ररुद्रैरितिपाठेनागर्तवश्चतुर्गुणाइतिनप्रतीयते॥अतोरुद्रनागर्तवइतिपाठःसाधीयान्॥स्फुटोर्थः॥न्यासः रू१३ क४८ क५० क२० क४४ क३२ क२४

प्रथमपक्षसाम्यार्थंकनिष्ठवर्गेणगुणनीयस्तस्यपदंकनिष्ठवर्गगुणितंज्येष्ठमेवअतउपपन्नंचेद्वर्गवर्गेणकृतोपवर्त्तःकनिष्ठवर्गेणतदा
निहन्याज्येष्ठमितिएवंत्र्यादिगतवर्गेणाप्युपपत्तिरिष्टव्या॥ अथवर्गेणापवर्तेनाववदुदाहरणमनुष्टुभाह॥ यस्यवर्गकृतिःपंचगुणावर्गशतोनि
ता॥ मूलंदाजायतेत्रिंशद्गणितज्ञतदाश्रुते॥ ९२॥ गणितमाकरेस्पष्टे॥ अथयत्रवर्गवर्गेणापवर्त्तःसंभवतिनात्रउदाहरणमनुष्टुभाह॥
कयोःस्वदेतरेवर्गेवर्गयोगोययोर्घनःतौराशीकथयाभिन्नौबहुधाबीजवित्तम॥ ९३॥ स्पष्टोर्थः॥ गणितमाकरेव्यक्तं॥ अथयत्रैकस्यप
स्यपदेगृहीतेसतिद्वितीयपक्षेसाव्यकोव्यक्तवर्गःसरूपोरूपोवाभवतितदासोपक्षोवर्गप्रकृतेर्नपदः॥ अतस्तत्रोपायमुपजातिकोनरा
र्घ्योपजातिकयाह॥ साव्यक्तरूपोयदिवर्णवर्गःतदान्यवर्णस्यकृतेःसमंतं॥ ७४॥ कृत्वापदंतस्यतदन्यपक्षेवर्गप्रकृत्योक्तवदेवभूले
कनिष्ठमाद्येनपदेनज्येष्ठंतुत्यंज्येष्ठंद्वितीयेनसमंविदध्यात्॥ ७५॥ अत्रयदिद्वितीयपक्षेसाव्यकोवर्णवर्गइत्येवविवक्षितं॥ रूपेषुपु
नरानास्था॥ तानिभवंतुमावाशेषंस्पष्टंव्याख्यानमार्याद्वयं॥ अत्रोपपत्तिः॥ एकस्यपक्षस्यपदेगृहीतेसतिद्वितीयेपक्षेसाव्यकोव्यक्त
वर्गःसरूपोरूपोवास्यात्सवर्गराशिरेव॥ अतउक्तंतदान्यवर्णस्यकृतेःसमंतमिति॥ अत्रद्वितीयपक्षस्यप्रथमपक्षेणापिसाम्यमस्तिकल्पि
तंतृतीयवर्गेणापिसाम्यमस्तीतिप्रथमपक्षस्यतृतीयवर्णवर्गेणसाम्यवक्त्रंज्ञेयंतृतीयवर्णवर्गस्ययत्पदंसतृतीयवर्ण एव॥ सएवा
न्यवर्णइत्युच्यतेअतःप्रथमपक्षस्यअन्यवर्णेनसाम्यस्यादित्यन्यवर्णमानस्यपूर्वपक्षपदेनसाम्यमुचितं॥ अतःद्वितीयपक्षस्यअ
न्यवर्गेणसमीकरणेकृतेसतिअन्यवर्णपक्षोवश्यंवर्गप्रकृतेर्विषयःस्यानथाहि॥ इहद्वितीयपक्षेयदिसाव्यकोव्यक्तवर्गोस्तितदान्य
वर्गेणसमीकरणेआद्यंवर्णशोधयेदन्यपक्षादित्यादिनाशोधनेकृतेपक्षोयथास्थितावेवस्यातां॥ अथचतुराहतवर्गसमेरित्यादिना
द्वितीयपक्षेव्यक्तवर्गेद्वयंरूपाणिचतथास्युर्यथामूलंलभ्यतेनतृतीयेतुसरूपोव्यक्तवर्गस्यादित्ययंवर्गप्रकृतेर्विषयः॥ अन्य
थायदिद्वितीयपक्षेसाव्यकोव्यक्तवर्गःएवंस्यात्तदासरूपोस्तितदाअन्यवर्णवर्गेणसमीकरणेद्वितीयपक्षेसाव्यकोव्यक्तवर्गएवस्या
त्॥ तृतीयेतुसरूपोव्यक्तवर्गःअत्रापिचतुराहतवर्गसमेरूपैरित्यादिकरणेतृतीयपक्षेसरूपोव्यक्तवर्गएवस्यादित्यवश्यंवर्गप्रकृ
तिर्विषयः॥ इहचतुराहतवर्गसमेरित्यादिकरणेपिसगुणपक्षेपिमथाद्वितीयतृतीयपक्षोसाम्येनत्यजतः॥ प्रथमस्तुसाम्येत्यजति॥

तत्रतथाकरणात्॥अतस्तृतीयपक्षस्यज्येष्ठवर्गःसकस्ययत्पदंज्येष्ठस्वरूपेणहीनोयपक्षपदेनैवसमेभवितुमर्हतिनप्रथमपक्षपदे
न॥अतउपपन्नेज्येष्ठेहीनेयेनसमंविदध्यादिति॥अथतृतीयपक्षेवर्गप्रकृत्यापदेगृह्यमाणेयत्कनिष्ठंतदेवप्राग्युक्तयुक्त्यातृतीयव
र्णमानं॥नत्वप्रथमपक्षपदेनतुल्यंभवितुमर्हति।तृतीयवर्णवर्गस्यप्रथमपक्षसमत्वात्॥अतउपपन्नेकनिष्ठमाद्येनपदेनतुल्यमि
ति॥अत्रोदाहरणमनुष्टुभाह॥त्रिकादिद्व्युत्तरश्रेढ्यागच्छेक्वापिचयत्पदे॥तद्वर्गत्रिगुणेकस्मिन्नन्यगच्छेभवेद्वद॥९४॥अनिरोहितो
र्थः॥गणितंस्पष्टमाकरे॥अथयत्रैकस्यस्वस्यपदेगृहीतेसतिहीनोयपक्षेद्वितीयादयोवर्णवर्गाभवेयुस्तत्रोपायमुपजातिकयाह॥सरूप
केवर्णकृतीनुद्यत्रतत्रैवचैकोप्रकृतिंप्रकल्प्य॥शेषंतनःक्षेपकमुक्तवन्मूलेविदध्यादसकृत्समस्ते॥७५॥सरूपकेइत्यत्रानियमःस
दिरूपाणिभवेयुस्तर्हितान्यपिक्षेपपक्षेप्रकल्प्यानि।वर्णकृतीतिहिवचनोपादानाद्यत्रत्र्यादयोवर्णवर्गाभवेयुस्तत्रत्र्यादिवर्णनामि
कृतिंव्यक्तानिमानानिप्रकल्प्यनेस्तानुत्तरपथस्थापयेत्॥यदिरूपाण्यपिसंतिनहानेषुप्रक्षिपेत्।एवंकृतेसतिसरूपकेवर्णकृती
एवभवतः॥अथानस्वेच्छयाएकोवर्णकृतिंप्रकृतिंप्रकल्प्ययत्पक्षशेषंवर्णवर्गमात्रंसरूपंवानक्षपकंप्रकल्प्यउक्तवन्मूलेविद
ध्यात्॥आत्रापिप्राग्युक्तयुक्त्यावर्णवर्गयोःकःसाप्रकृतिः॥अत्रदृष्टइत्यधिकरणेकनिष्ठंव्यक्तंकल्पनीयंयतस्तथासतिवि
शेषविधिनासरूपोवर्णवर्गएवस्यात्कृतिकथमपिनज्येष्ठपदतामेति॥किंतुक्षेपसजातीयोवर्णःकनिष्ठंकल्प्ययतस्तथासतिनस्यव
र्गप्रकृत्यागुणितःक्षेपसजातीयोवर्णवर्गःस्यादितरभयोःसाजात्ययोगेसतिवर्णवर्गएवस्यादतोस्यपदंसंभवेत्॥क्षेपसजातीय
वर्णोयेकादिगुणितस्तथाकल्प्योयथाशेषविधिनाभंकनोपिमूलंलभ्येत॥ननुयत्रसरूपोवर्णवर्गःक्षेपस्यात्तत्रक्षेपसजातीय
वर्णेकनिष्ठेकल्पितेपिशेषविधिनासरूपोवर्णवर्गएवस्यादितिकथंज्येष्ठपदतामेतीत्रेत्॥सत्यं॥तत्रक्षेपसजातीयवर्णःस
रूपःकनिष्ठंकल्पनीयं॥तथासतिशेषविधिनाव्यक्तवर्गोव्यक्तंरूपाणिचस्वराशिमिज्येष्ठंपदंलभ्येत।परंवर्णोकोरूपंकश्चमुक्त्या
तथाकल्पनीयोयथा॥शेषेविधौलब्धेसत्यंकनोपिमूलंलभ्येत॥अथयदिवर्णगतप्रकृतिराशिनादृष्टभक्तोहिधाक्षेपइत्यादि
नामूलंसाध्ये॥ननेवंकृतेपिकनिष्ठज्येष्ठयोरव्यक्तस्वरूपत्वाद्राशिमानमव्यक्तमेवस्यात्तत्किमनेनेत्यत्राह॥असकृत्समत्वइ

७६

नि॥अयमर्थःशेषतापविधिनायदिपुनःसमीकरणंकर्तव्यमस्तिनराशिमानेअव्यक्तंयुक्तमेव॥यदितुशेषतापविधि
र्नास्तितदाव्यादिवर्णनामिवहीनायवर्णस्यापिव्यक्तमेवानीकल्पनीयं॥तथासतिसरूपोव्यक्तवर्गएवस्यादितिप्राग्वदुर्गप्रकृत्याराशि
मानंव्यक्तमेवसिध्येत्॥अत्रोपपत्तिःप्राग्वदेव॥इयांस्तुविशेषःतत्रप्रकृतिवर्णमानंव्यक्तंकल्पितमिहपुनरव्यक्तंव्यक्तंवाकल्प्यत
इति॥अत्रोदाहरणमनुष्टुभाह॥तोराशीवदयकृत्याःसप्तघ्नगुणयोर्युतिःमूलदास्याद्वियोगस्तन्मूलदोरूपसंयुतः॥अनिरोहितोर्थः॥गणि
तमाकरेव्यक्तं॥अथयत्रप्रकृतिवर्गगतास्याभाहरमुदाहरणमनुष्टुभाह॥घनवर्गयुतिर्वर्गोयोराश्योःप्रजायते॥समासोपिययोर्वर्ग
योराशीशीघ्रमानय॥९६॥स्पष्टार्थः॥गणितमाकरेस्पष्टं॥अथयत्रैकपक्षस्यपदेगृहीतेद्वितीयपक्षेयदिवर्णवर्गोभावितंचस्यात्॥तत्रोपा
यमुपजातिकयाह॥सभावितेवर्णकृतीनुद्यत्रतन्मूलमाहायनुद्धेषकस्य॥इष्टोद्धृतस्येववर्जितस्यदक्षेनतुल्यंहितदेवकार्यं॥९७॥यत्र
हीनायपक्षेवर्णवर्गोसभावितोस्यात्तेनहानदंवर्गितोयावतोमूलंलभ्यतेतावतोयाह्योअथयत्रक्षेपंतदिष्टेनभाज्येयल्लभ्यतेतत्तेनैवेष्टेनवि
वर्जितंचकार्यं॥अथास्यदक्षेननपूर्वंगृहीतस्यस्वेदमूलस्यसमीकरणंकार्यं॥अत्रयद्यपिक्रियायतःपक्षस्वेदस्यमूलंग्राह्यमितिनियमो
नकृतोस्तितथापियथैकस्यवर्णवर्गस्यस्वेदमात्रमवशिष्येणतथापदंग्राह्यमितिद्रष्टव्यं॥अन्यथाक्रियानिर्वहेत्॥इहशेषस्यवर्णवर्ग
स्यसजातीयवर्णःस्वकेमिष्टंकल्पनीयं॥अत्रापिराशिमानमव्यक्तमेवसिध्यतीतिप्राग्वदसकृत्समस्तेसतीतिद्रष्टव्यं॥यदातुशेषता
पविधिनास्तितदैकंराशिंव्यक्तमेवप्रकल्प्यक्रियाकार्या॥अत्रोपपत्तिः॥एकस्यपक्षस्यपदेगृहीतेयोहीनायपक्षःसभावितवर्णवर्गदूया
त्मकोस्तिसवर्गएवपक्षयोःसमत्वात्॥अथयावत्स्वत्वंइस्यमूलंलभ्यतेनस्वेदमपिवर्गराशिरेव।कथमन्यथातन्मूलंलभ्येत।अतो
ह्रस्वराशिवर्गःस्वेपूर्णपक्षमूलघुराशिवर्गात्मकेपक्षस्वेदेपनीतेयच्छेषंतन्मूलघुह्रस्वराश्योर्वर्गांतरमेव॥अतोन्तरमिष्टप्रकल्प्यवर्गांत
रराशिवियोगभक्तंइत्यादिनायोगःस्यात्।अतःशिष्यमिष्टोनंजात्योयोगः॥अथाभ्यांयोगांतराभ्यांयोगोंतरेणोनयुतइतिसंक्रम
णराशीस्यातांतत्रयोगांतरेणयुतोर्द्धितंबह्वल्पराशिःस्यात्॥ततयोजनाभावाभ्योंकःएवंयोगांतरेणवर्जितोस्यस्वेदंलघुराशिःस्या
त्॥तत्रशेषमिष्टोद्धृतंपक्षस्वेदंलघुराशिवर्गात्मकमस्तीतितत्पदमपिलघुराशिरेव॥अतएवतयोरभयोःसमीकरणंकर्तुयुक्तमेव॥

अतउपपन्नं शेषकस्यरूपोनस्येष्टविवर्जितस्यदलेननुल्येहिनदेवकार्यमिति॥अत्रोदाहरणमनुष्टुभाह॥ययोर्वर्गयुतिर्घातयुतामूलप्रदाभवेत्॥तन्मूलगुणितोयोगःसरूपश्चाभ्युतोवद॥७७॥स्पष्टोर्थः॥गणितमाकरेस्पष्टं॥अथक्रियालाघवंप्रदर्शयितुंकस्यचिदुदाहरणंदर्शयति॥यस्यात्मात्म्यवधार्धोनघनपदमिति॥९८॥शार्दूलविक्रीडितमेतत्॥अत्रसात्म्यहनंईकाहिनिपाठश्चेत्सा धीयान्॥यतोस्मिन्पाठेसात्म्येनिहतेविशेषगुणभक्तेरायंप्रतीयते॥शेषंस्पष्टं॥अत्रालापानांबहुलेसरू, क्रियानतिर्वहति॥अतो बुद्धिमतनथाराशीकल्प्यो॥येषेकेनैववर्णेनसर्वेप्यालापाघटेरन्॥तथाचार्थः-कल्पितो॥याव१रू१या२वा॥याव१या२या२पू२वा॥या व१या२या२पू२वा॥याव१यावा४पू३या२पू४गणितमाकरेस्पष्टं॥एवमाचार्यैःस्वबुध्याराशीप्रकल्प्यगणितंप्रदर्शितं॥अथमेदानीराशिक ल्पनोपायआवश्यकः॥तत्रतत्प्रतिपादकंसूत्रमेवयदिष्यतेनदाकावेतोराशीयदर्थमिदंसूत्रंप्रवृत्तमितिकस्यचिदनबोधःस्यात्तन्नि रासार्थं॥आदौप्रतिजानीतेनुष्टुभा॥एवंसहस्रधागूढामूढानांकल्पनायतः॥क्रियायाकल्पनोपायस्तदर्थमथकथ्यते॥यथेहचतुर्धारा शिकल्पनाहृताएवंराशिकल्पनासहस्रधास्तिसायतोमूढानांगूढास्तदर्थंक्रिययाकल्पनोपायःकथ्यते॥अथप्रतिज्ञानमुपायमुप जातिकेनवक्त्राभ्यामाह॥सरूपमव्यक्तमरूपकंवियोगमूलंप्रथमंप्रकल्प्य॥योगोनरक्षेपकभाजितोघवर्गोनरक्षेपःकनःपदंस्या त्॥नेनाधिकंतनुवियोगमूलंस्याद्योगमूलंतुनयोस्तुवर्गौ॥स्वक्षेपकोनोतुवियोगयोगोस्यात्तोनतःसंक्रमणेनराशी॥८०॥स्पष्टोर्थः॥ योगोनरक्षेपकभाजितादित्यत्रकेचिद्यत्रयोगोनरोस्तुल्यंक्षेपस्तत्रैवनेनसूत्रेणराशिकल्पनेननुअतुल्यक्षेपेदृष्टव्यं॥अत्रोपप त्तिः॥इहनावदिदंविचार्यते॥ययोवर्गोनरस्वक्षेपेणयुतेमूलदेस्यातोनयोर्वर्गोनरेकेनयुतंमूलदंस्यादिति॥तत्रेदंसम्मसिद्धं॥वर्गयो र्घातोघातवर्गोभवतीति।क्षेपयुतेचयोगोनरेयोगवियोगमूलयोर्वर्गौ॥अतस्तयोर्घातोयोगवियोगमूलयोर्घातवर्गःस्यात्॥वर्गोनि रेनुकेवलयोर्गोनरघातः॥अतःकेवलयोर्गोनरयोर्घातस्यक्षेपयुतयोर्गोनरयोर्घातस्यचयदेनरंसवर्गोनरक्षेपोभवितुमर्हति॥य तोर्वर्गोनरेणनक्षेपेणयुतेसतियोगवियोगमूलयोर्घातवर्गःस्यात्॥इत्यतोमूलंलभ्येत॥तदेतदयथा॥तत्रक्षेपयुतयोर्गोनरयो १ क्षे १ अं १ क्षे १ अत्रयोर्घातार्थंन्यासः यो १ अं १ क्षे १ / क्षे १ अं १ क्षे १ घातेहतेजातोयोगवियोगयोर्घातवर्गः॥यो अं १ अं क्षे १ क्षेव १ अत्रद्वितीयरूपेउ ७७

क्षेपयुतोस्ति॥तत्रयोगोन्यथासाध्यते॥योगमूलवर्गःक्षेपोनःसन्जातोयोगः योमू२ क्षे १ अयंक्षेपेणयुतोजातोद्वितीयरूपंयोमू२क्षे १ क्षेव १ अनयैवयुक्त्याजातंतृतीयरूपेउ मपि। अंमू२क्षे १ क्षेव १ अत्रोभयत्रप्रथमरूपेमूलवर्गःक्षेपयुतोस्ति॥अतस्तयोर्योगोजातोमूल वर्गोयोगःक्षेपयुतः॥योमूअंमू२योक्षे १ द्वितीयरूपेउयोर्योगेजातेक्षेव २ एवंजातोद्वितीयंतृतीयरूपेउयोगःयोमूअंमू२योक्षे १ द्वितीयरूपेउयो र्योगेजातेक्षेव २ एवंजातोद्वितीयंतृतीयरूपेउयोगःयोमूअंमू२योक्षे १ क्षेव २ एवंजातानिचत्वारिरूपेउानि॥योअं १ योमूअंमू२योक्षे १ क्षेव २ क्षेव १ अत्रोत्यरूपेउयोर्योगेजातानित्रीणिरूपेउानियोअं १ योमूअंमू२योक्षे १ क्षेव १ एवंजातोयोगवियोगमूलयोर्घातवर्गःरूपेउत्रयात्मकः तत्रापिघरूपेउवर्गोनरं। इनरत्वेदृश्यंवर्गोनरक्षेपःनदेवंयोगवियोगमूलयोर्घातवर्गोवर्गोनरात्साध्यमानेरूपेउद्वयात्मकःक्षेपोमहान्भव ति॥अथयोगवियोगमूलघातवर्गादल्पोयदिवर्गोनरात्साध्येनदाक्षेपोपीलघीयान्स्यादतःक्षेपेणनघातवर्गःसाध्यते॥तत्रक्षेपोनोमू लघातोयं॥योमूअंमू १ क्षे १ अस्यवर्गःस्वाक्षेपोत्यवर्गेदत्यादिनाजातःयोमूवअंमूव १ योमूअंमूक्षे २ क्षेव १ अत्रप्रथमरूपेउंमूलघातवर्गो स्तिअतोमूलघातवर्गंयदिमूलयोर्द्विघ्नोघातःक्षेपयुतितःशोध्यतेनदाक्षेपोनघातवर्गोभवतीतिसिद्धं॥तत्रपूर्वसिद्धोयमपि १ यो अं १ योमूअंमूवयोक्षे १ क्षेव १ मूलघातवर्गः॥अथात्रक्षेपोनमूलघातस्यवर्गार्थंप्रागुक्तंशेषंध्यमिदं॥योमूअंमूक्षे २ योज्येचेदेक्षव १ योज्येयोजितेंत्यरूपेउनाशंजातंरूपेउद्वयंयोअं १ योमूअंमूवयोक्षे १ अत्रद्वितीयरूपेउंमूलवर्गोयोगःक्षेपयुतोस्तिशेषंध्यत्रद्विघ्नोमू लघातःक्षेपयुतः॥अत्रोभयत्रक्षेपोयुतोस्ति॥तत्रगुणितयोर्वियोगेवियुक्तयोर्वायुतेकश्चिद्विशेषोनास्तीतिप्रथमतएववर्गयोगा द्विघ्नघाते।पनीतेरात्रयोरंतरवर्गेणद्विघ्नेघातेयुतेनयोर्वयोगेभवेदित्यकालाद्वितीयविधिनाजातोमूलांतरवर्गःसन्क्षेपयुतः सन्जातेद्वितीयरूपेउं।मूअंक्षे १ एवंजातःक्षेपोनघातस्यवर्गःरूपेउद्वयात्मकः॥योअंमूअंक्षे १ अत्रप्रथमरूपेउवर्गोतरंद्वितीयरूपेउवर्गो तरंद्वितीयरूपेउवर्गांतरंक्षेपः।अतःसिद्धमिदंयोगांतरक्षेपोमूलांतरवर्गयुतितःसन्वर्गांतरक्षेपोभवतीतिअतोयोगांतरक्षेपेण वर्गांतरक्षेपेभक्तेयद्भज्यतेसयोगवियोगमूलांतरवर्गएव॥अस्यमूलंयोगवियोगमूलयोरंतरमेवस्यात्॥अतोवियोगमूलमने नसुष्ठुसयोगमूलंस्यात्॥इदंवायुक्तंसन्वियोगमूलंस्यात्॥अतःसुष्ठूक्तंयोगांतरक्षेपभाजिताघवर्गांतरक्षेपकतःपदंस्या

तू।नेनाधिकेननुवियोगमूलंस्याद्योगमूलकमिति॥एवंयोगमूलंप्रथमतःसरूपमरूपंवाव्यक्तंप्रकल्प्यतनउक्तयुक्त्याविवियोगमूलंसाध्यं॥
एवंसिद्धाभ्यांयोगवियोगमूलाभ्यांविलोमविधिनायोगवियोगौसाध्यौ॥तत्रयोगःक्षेपोस्यमूलंभवतीतियोगमूलंवर्गीतंक्षेपोनंस
योगःस्यात्॥एवंवियोगमूलाद्वियोगोपिस्यात्॥अनउक्तंनयोस्तवर्गीस्वक्षेपकोनोहिवियोगयोगाविति एवंयोगवियोगसिद्धौसं
क्रमणेनराशिज्ञानंसुगमं॥एतयोःराश्योःमूलत्रयानुरोधेनसिद्धत्वादवश्यंमूलत्रयलाभःभवति॥शिष्टपदद्वयलाभेनुननियमोस्ति
नदनुरोधेनराश्योरसिद्धेः।अतएववक्ष्यमाणोदाहरणेमूलत्रयानुरोधेनसिद्धयोरव्यक्तराश्योःसात्म्यवधस्यार्धात्घनपदंवर्गीक्य
द्वापदंनलभ्यते।ननुनहिप्रकृतोदाहरणेकथंपदद्वयलाभोस्तीतिचेत्॥उच्यते।प्रकृतेमूलत्रयानुरोधेनसिद्धयोरव्यक्तराश्योर्यादृशो
विधिनापदलाभोस्तिनादृग्विधेरेवादिष्टत्वात्॥तथाहि॥प्रकृतेमूलत्रयानुरोधेसिद्धौअव्यक्तराशीयाव१भू१या१अनयोर्वधः॥याघ१
या१अयंअल्पराश्वूनोद्विगुणोघनोस्तिअतोयंयदिसात्म्योधिनभक्रियतेनदाघनोभवतीतिघनपदंलभ्यतेअतःप्रभृतिदाग
केनायमेवविधिरुदाहरणेनिबध्यः॥एवमत्रसात्म्यवधार्द्धनुर्गुणादपिघनपदंलभ्यतेततोसावपिविधिर्यदुदाहरणेनिबध्येतत
दाप्रकृतउद्दिष्टसिद्धिस्यात्॥एवंवर्गेत्यपदेपिद्रष्टव्यं।पदमिति।नदानुमूलत्रयानुरोधसिद्धाभ्यामव्यक्तराशिभ्यांनोद्दिष्टसि
द्धिः।नचेदंसिद्धं॥षट्वाष्टकयोर्वधार्द्धात्म्यात्॥५४॥स्त्रियुतात्॥६४॥घनपदस्तेभवात्॥तदेवसरूपमव्यक्तमरूपंकृत्वेत्यादिना
सिद्धयोरव्यक्तराश्योर्वियोगमूलयोगमूलवर्गीतरमूलान्योनियतानिनतुपदंचक्रमपिनियतमपिसिद्धं॥अथास्यसूत्रस्य
व्याप्तिंदर्शयितुंउदाहरणंशार्दूलविक्रीडितेनाह॥राश्योर्योगवियोगकृतिसहितौवर्गौभवतोनयोर्वर्गैक्यंचतुर्गुणितंरवियुतं
वर्गीतरस्यात्कृतिः॥सात्म्यंघातदलंघनःपदयुतिस्तेषांद्वियुक्ताकृतिस्तोराशीवदकोमकामकमतेषट्सप्तहिताःपरे॥स्पष्टो
र्थः॥अत्रकयोराश्योर्योगवियोगौत्रिसहितौवर्गौभवेतामितिविचारेषट्सप्तयोःशीघ्रमुपस्थितिर्भवति।यदृच्छयावानयोःस
र्वेष्वात्तापाघटतेहति।अनभिज्ञोपिअस्यप्रभृत्योनरंवदेदिति।तन्निरासार्थमुक्तंषट्सप्तहितेति।अत्रप्रथमंरूपोनमव्य
क्तंयावं१भू१वियोगमूलंप्रकल्प्येत्यादिनासरूपयुक्त्याराशीआनीययावं१भू१या२गणितमाकरेस्पष्टं॥आर्ययानिबध्यमाद्योदाहर

णेशिष्यबुधिप्रसारार्थंप्रदर्शयति॥राश्योर्ययोःकृतियुतिवियुतीचैकेनसंयुतेवर्गौ।रहितेवानौराशीगणयित्वाकथयययदिवेत्सि॥१००॥
स्पष्टोर्थः॥अत्रप्रथमोदाहरणेकल्पितौराशीयाव४यावं५भू१द्वितीयोदाहरणेराशीयाव४या५भू१गणितेराशिकल्पनेयुक्तिश्चआक
रएवस्पष्टः॥अथैकस्यपदेगृहीतेसतिद्वितीयपक्षेयदिसरूपमव्यक्तमरूपंवाव्यक्तंभवतितत्रोपायमनुष्टुभार्द्धेनाह॥यत्राव्यक्तंसरूपं
हितत्रतन्मानमानयेत्॥सरूपस्यान्यवर्णस्यकृत्याद्यानासमं॥८१॥राशिंतेनसमुत्थाप्यकुर्याद्ध्रुवोपरक्रियां॥सरूपेणान्यवर्णेन
कृत्वापूर्वपदंसमं॥८२॥यत्राद्यपक्षमूलेगृहीतेःन्यपक्षेव्यक्तंसरूपमरूपंवास्यात्तत्रान्यवर्णस्यसरूपस्यवर्गेणसाम्यंकृत्वातस्याव्यक्त
स्यमानमानयेत्॥तत्रप्रथमपक्षस्यघनपदेगृहीतेःन्यपक्षेव्यक्तंसरूपमरूपंवास्यात्तत्रान्यवर्णस्यसरूपस्यघनेनसाम्यंकृत्वाव्य
क्तस्यमानमानयेत्॥कृत्यादिनेत्यादिपदात्पदानां॥अथागतेनवर्णीतकेनअव्यक्तमानेनराशिमुत्थाप्यसरूपेणकल्पितेनान्यवर्णेन
आद्यपक्षपदसाम्यंकृत्वापुनरुक्तक्रियांकुर्यात्॥यदिपुनरुक्तक्रियानास्तितदासरूपस्यान्यवर्णस्यवर्गादिनासमीकरणंनकार्यं॥यतस्तथा
कृतेराशिमानमव्यक्तमेवस्यात्॥अत्रव्यक्तवर्गेअव्यक्तघनेवानथाकल्पेयथामानमभिन्नंस्यादिति॥आद्यपक्षपदेगृहीतेद्वितीय
पक्षेयदव्यक्तंकेवलंसरूपंवातदपिद्वितीयवर्गएवआद्यपक्षस्तुस्यत्वात्।अतःकेनचिद्वर्गेणसमीकरणमुचितं॥यत्पुनर्यदिव्यक्तंनैव
वर्गेणक्रियतेनराशिर्व्यक्तएवस्यादितिरोषात्पक्रियावतारोनस्यात्।अतएवशेषक्रियायाअभावेइदमुचितमेव॥नस्माच्छेषवि
धौकर्तव्येन्यवर्णस्यकेवलस्यसरूपस्यवावर्गेणसमीकरणमिति॥एवंसतिसरूपस्यान्यवर्णस्येतियदुक्तं — यमाशयःयत्रद्वि
यत्रद्वितीयपक्षेकेवलमव्यक्तमस्तितत्रव्यक्तंकृणितस्यकेवलस्यान्यवर्णस्यवर्गेणसमीकरणमुचितं॥यत्रापिद्वितीयपक्षेस
रूपमव्यक्तंनत्रापियदिरूपाणामव्यक्तेनापवर्त्तःसंभवस्तर्हिउक्तविधिनान्येववर्णवर्गासमीकरणमुचितमेवयतःसमकरणेशोध
नेवअन्यवर्णवर्गपक्षेपूर्वीव्यक्तपक्षजानिरूपाणिभवेयुस्तथासतिआद्यभक्तेपक्षेन्यस्मिन्निक्षिप्तेमानमभिन्नंस्यात्॥तथापि
यत्रव्यक्तेनरूपाणांनापवर्त्तःसंभवतितत्रकेवलस्यान्यवर्णस्यवर्गेणसमीकरणेमानंभिन्नमेवस्यात्॥अन्तउक्तंसरूपस्येति।
अत्ररूपाणितथाकल्प्यानियथासमशोधनेनरूपनाशोभवेदथवाव्यक्तेनतेषामपवर्त्तःस्यात्॥रूपक्षेपोपायश्चहरभक्तायं

स्यकृतिरित्यादिवक्ष्यमाणउद्देशः मदेरेस्तुहरभक्तेनिस्थानेऽव्यक्तकभक्तेनिपातित्वाद्वक्ष्यमाणविधिनापूर्वाणिकल्प्यानि॥शेषंस्पष्टं॥
अत्रोदाहरणमनुष्टुभाह॥यस्त्रिपंचगुणोराशिःपृथक्सैककृतिर्भवेत्॥वदतंबीजमध्येऽस्मिन्मध्यमाहरणेपटुः॥१०१॥स्पष्टोऽर्थः॥ग
णितमाकरेस्पष्टं॥पूर्वपक्षस्यघनपदेगृहीतेसतिअन्यवर्णस्यघनेनसमीकरणंकार्यमित्युक्तंतत्रोदाहरणमाद्यैरनुष्टुभानिबंध्द
रीयति॥कोराशिस्त्रिभिरभ्यस्तःसरूपोजायतेघनः॥घनमूलंकृतीभूतंत्र्यभ्यस्तंत्रिरूनयुक्॥१०२॥स्पष्टोऽर्थः॥गणितमाकरेस्पष्टं॥
अथविशेषप्रदर्शनायमुदाहरणमनुष्टुभाह॥वर्गीनरंकयोराश्योःपृथक्द्वित्रिगुणंश्रियुक्॥वर्गौस्यातांवदक्षिप्रंषट्पंचकयोरिव॥
॥१०३॥अत्रापिविचारेणापिषट्पंचकयोरूपस्थितिर्भवतीतिअनभिज्ञोऽयंप्रश्नस्योत्तरंवेदनउक्तंषट्पंचकयोरिवेतिति॥षट्
पंचकयोर्वर्गीनरंउक्तविधमस्तीतिप्रसिद्धमेवास्तिकिंतुएतयोर्वर्गीनरंयथाउक्तविधमस्तितथान्ययोःकयोराश्योरस्तीतिप्रश्नार्थः॥अत्रराश्योरव्यक्तकल्पनेक्रियानिर्वहतीत्येतावर्गीनरमेवाव्यक्तंकल्प्यमितिप्रदर्शयन्नाह॥क्वचिदादेशिति॥स्पष्टोऽर्थः॥
अत्रावर्गीनरस्यैवयद्यव्यक्तमानंकल्प्यतेनर्हियस्त्रिपंचगुणोराशिरित्यादिनाप्रायुक्तोदाहरणवत्सुखेनोदाहरणसिद्धिःस्यात्परमियान्विशेषः॥तत्रराशिरव्यक्तःकल्पितइतिराशिमानमेवसिध्येत्॥इहतुवर्गीनरमव्यक्तंकल्पितमितिराश्येावर्गीनरमेवसिध्येत्॥अतोंत
रमिष्टंप्रकल्प्यवर्गीनरंराशिवियोगभक्तमित्यादिनावर्गीनराद्राशीसाध्वितिगणितमाकरेस्पष्टं॥अथयत्राव्यक्तेसरूपेहीत्य
त्रविशेषमाहसार्धार्यानुष्टुभाह॥वर्गादेर्येहरस्तेनगुणितंयद्विजायते॥अव्यक्तंतत्रतन्मानंअभिन्नेस्याद्यथातथा॥८४॥कल्प्योन्य
वर्णवर्गादिसुल्यःशेषं॥यथोक्तवत्॥एतदुक्तंभवति॥यद्यपिएकस्यपक्षस्यपदेगृहीतेसतिद्वितीयपक्षेयदव्यक्तमस्ति
तस्मिन्वर्गादेर्हरेणान्येनवाकेनचिद्गुणकेनगुणिते जातेसतिनकश्चिद्विशेषोस्तीतिपूर्वसूत्रएवतन्मानमभिन्नंस्याद्यथातथा
कल्प्योन्यवर्णवर्गादिरितिविशेषोयद्युक्तःस्यात्तदेवंसूत्रंव्यर्थमेव॥नथापिअन्यत्रराशिमानेभिन्नंप्यागतेशेषविधिनाराशि
मानंभिन्नमेवस्यात्॥इतितत्रायंविशेषोनावश्यकत्वात्॥इतिसंक्षेपः॥इहतुवर्गकुट्टकेशेषविधेरभावात्॥अन्यवर्णवर्गासमीकर
णमात्रेणयथाराशिरभिन्नःस्यात्तथायतितव्यमितिशेषस्यावश्यकत्वात्॥पृथक्सूत्रमपेक्षितमेव॥एवंघनकुट्टकेपि॥ननुत

थापियत्रशेषविधेरभावस्तत्रतन्मानमभिन्नंस्याद्यथातथान्यवर्णवर्गादिःकल्प्इत्येतदर्थकंसूत्रमपेक्षितं॥ननुवर्गादेर्यो
हरस्तादितिचेत्॥न॥अन्यत्रराशिमानेभिन्नेप्यागतेभवत्कदृष्टंसिध्यतिहतुनतथा॥नहिभिन्नराशेर्वर्गउद्दिष्टक्षेपयुतोनेभिन्नोनो
द्दिष्टहरेणभक्तःशुध्यति॥एवंघनोपि॥तस्मादत्रराशिमानंस्याभिन्नंतावश्यकंयावर्गादेर्योहरस्तेनगुणितमित्युक्तं॥ननुशेषविधेर
भावश्चेन्नहिव्यक्तेनेववर्गादिनासमीकरणमस्तीतिचेत्॥उच्यते॥तन्नाव्यक्तंकल्पथाकल्प्यंयथास्यवर्णेसमीकरणेराशिमानमभि
न्नंस्यात्॥इहापिव्यक्तंकल्पनमेवगरीयोस्तिनहिअन्यवर्णकल्पनेकिंचित्क्षतिरस्तिकिंतुपूर्वव्यक्तंकेनगुणितएवसकल्प्य
तेकिंचिद्व्यक्तवर्गादिनासमीकरणेनउत्पन्नोराशिरेकएवस्यात्॥इहतुक्षेपवशादनेकेराशयःस्युरितिमहान्विशेषःइत्यादिसुधीभि
र्दूषणं॥अत्रोदाहरणद्वयमनुष्टुभाह॥कोवर्गश्चतुरूनःसन्सप्तभक्तोविशुध्यति॥त्रिंशद्गुणोथवाकस्त्रिंयदिवेत्सिवदद्रुतं॥१०४॥स्पष्टोऽर्थः
इदमुदाहरणद्वयंवर्गकुट्टकस्यकुट्टकोहिगुणविशेषःप्राग्उक्तःसइहवर्गपूपोस्ति॥यतोस्यप्रश्नस्यायंकः केनगुणितश्चतुरूनःसन्सप्तभक्तोविशु
ध्यतीत्यत्रपर्यवसानमस्ति॥एवंद्वितीयप्रश्नस्यापि॥एवमनयंकः केनघनेगुणितउद्दिष्टक्षेपयुतोनउद्दिष्टहरेणभक्तःशुध्यतीत्यत्रयःप्रश्नपर्व
न्स्यात्सघनकुट्टकःप्रश्नः॥गणितस्यष्टमाकरेतन्मानमभिन्नंयथास्यात्तथान्यवर्णवर्गादिःकल्प्इत्युक्तं॥तत्रमंदावबोधार्थमार्यायागीति
श्लोकेनपूर्वैःपठितमुपायंदर्शयति॥हरभक्तायस्यकृतिःशुध्यतिसोपिद्विरूपपदगुणितः॥तेनाहतोन्यवर्णोरूपपदेनान्वितःकल्प्यः॥८५॥न
यद्विपदेरूपाणीक्षिप्त्वेत्यरंनेपुहरतेष्टेषु॥तावद्यावद्वर्गोभवतिनचेदेवमपेक्षितंकेतर्हि॥८६॥हत्वाक्षिप्त्वाचपदेयत्राद्यस्येहभवतिनत्वापि
आत्मापिनएवहरोरूपाणिनुरोधितानीत्यादि॥८७॥अस्यार्थः सोपपत्तिकउच्यते॥इहवर्गकुट्टकेकोवर्गउद्दिष्टक्षेपेणयुतऊनोवाउद्दिष्टह
रभक्तःशुध्यतीत्यात्मापोस्ति॥तत्रराशेर्यावत्तावद्राशेकल्पितेतस्यवर्गोयथासंभवंक्षेपेणयुतऊनेनवाकृतेहरेणहीयमाणेक्षिप्तेनूत्क्षिप्तेनेति
यत्तेनलब्धेभ्यमाणंकाळकःकल्प्यते॥अथहरणगुणात्लब्धेस्वाग्रेणयुताभाज्यसमाभवतिइतिसर्वत्रप्रसिद्धमस्ति॥इहतुअग्राभावात्ह
रगुणितेवर्गेलब्धेभाज्यसमाभवितुमर्हतिलब्धंश्चात्रकाळकात्मकमव्यक्तं॥अतोवर्गादेर्योहरस्तेनगुणितमव्यक्तंहीनंयपक्षेभवति॥पू
र्वपक्षेतुयावत्तावद्वर्गःक्षेपतुल्यानिरूपाणिचभवंतीति॥अथानयोःसमशोधनेनपूर्वपक्षाणिरूपाणिहीनंयपक्षेभवंति॥एवमत्रद्वितीयपक्षेहर

तुल्योवर्णकः क्षेपेतुल्यानिरूपाणिधनमृणंवाभवेन्नीतिस्थिर्थे॥अथपूर्वपक्षस्यवर्गात्मकत्वात्पदेगृहीतेद्वितीयपक्षोपिपूर्वपक्षसमस्तान्नद्
र्गएवेतिकस्यचिदन्यवर्णस्यवर्गेणसमीकरणंकर्तुंयुज्यते।परमन्यवर्णस्तथाकल्प्योयथास्यवर्गोद्वितीयवर्णेकनडदृष्टहरात्मकेनहृतः
शुध्येत्। यथासतिद्वितीयवर्णमानेऽभिन्नंस्यात्। ननुयस्यवर्णस्यसरूपस्यारूपस्यवा वर्गःप्रथमद्वितीयवर्गेभ्योतुल्यनयाकल्प्यते।
सयादृशोवर्णःपूर्वपक्षपदसमोभावितुमर्हतिनयोःसमीकरणेनराशिमानेसिध्येत्। नद्यादिकहाविद्भिरंस्यानदाकुट्टकेनाभिन्नंकर्तुंयुज्य
ते॥द्वितीयवर्णरूपनरराशिरेवंसतिनमानस्याभिन्नत्वार्थंरूपान्यूनशेषोनिरर्थकइतिचेन्न। उच्यते॥दृढहिद्वितीयवर्णोनिःशेषलब्धिःकल्पिता
सितायदिभिन्नास्यान्नदासकोराशिरस्तियस्यवर्गःक्षेपयुतोनोहरभक्तोनशुध्येत्।अपितुसर्वस्यापिवर्गःउक्तविधिशुध्येदेव।अतः
प्रभोन्यर्थएवस्यात्॥तस्माद्वितीयवर्णमानेऽभिन्नमेवयथाभवतितथायतितव्यं।तदर्थंहरभक्तायस्यरूतिरित्यादिसूत्रस्यप्रवृत्तिः॥
तत्रद्वितीयपक्षेहरतुल्योवर्णोकःक्षेपतुल्यानिरूपाणिभवंतीतिस्थितं॥क्षेपाभावेतुहरतुल्यावर्णएवभवतिनरूपाणि।तत्ररूपाभावेनावतु
ष्यते। यस्यरूतिर्हरभक्तासतीशुध्यतिनेतीकेनगुणितोन्यवर्णःकल्प्यःतथासतिनस्यवर्णस्यवर्गोहरभक्तःशुध्येदेव।अतएवतादृशः
न्यवर्णवर्गःकल्पितेद्वितीयवर्णमानंअभिन्नंस्यात्।अत्रयद्यपिहरगुणितोन्यवर्णेकल्पितेनस्यवर्गोहरभक्तःशुध्येदेवेतिहरभक्तोन्यव
र्णःकल्प्यइत्येवंवक्तुमुचितंतथापितथाप्योन्यवर्णःकल्पितोन्यवर्णःसएवरूपशेषःपर्यवस्यतिएवंसतिहरान्यूनेनदंकेसंभवतिस
तियद्हरतुल्यास्तदंकाःकल्प्यंतेनतदाक्षेपोमहान्स्यादितिनसकलराशिलाभःयदिकुट्टकेनापवर्तिनहरभाज्ययोःक्षेपस्यकल्पनेन
सकलगुणलब्धिलाभःकिंतुतद्दयोस्तयोःक्षेपेसकलगुणलब्धिलाभोस्ति।नहूद्दहापि॥अतःसकलराशिलाभार्थंहरभक्तायस्यरू
तिरित्यादिसूत्रंकृतं॥अत्रयस्यन्यूननमस्तीतिद्रष्टव्यं॥अन्यथाक्षेपमहत्त्वेनदोषतादवस्थ्यंगौरवंस्यादिति॥अथद्वितीयपक्षेरूपाणिसं
तिनदाताभिरूपाणिहरभक्ताभिश्शुध्यंतिनवेतिविचारणार्थंयद्येताभिश्शुध्यंतिनदाप्राग्वदेवहरभक्तायस्यरूतिश्शुध्यतिनेतादृग्न्यव
र्णःकल्प्यःउक्तयुक्तेरविशेषात्।किंतुसमशोधनेनद्वितीयपक्षरूपाणिअन्यवर्णवर्गपक्षेभवंतिनान्यथापियद्हरभक्ताभिश्शुध्यंतिन
रान्यवर्णमानमभिन्नमस्तीत्थमेव।अथयद्द्वितीयपक्षगतानिरूपाणिहरभक्ताभिश्शुध्यंतिनदाप्राग्वदन्यवर्णकल्पनेपिसमशो॥८०॥

धनेनेनद्वितीयपक्षरूपाणांहृतीयपक्षगमनेनैषांहरेणभक्तोद्वितीयवर्णमानमभिन्नंनस्यात्।तदर्थंतृतीयपक्षस्तथाकल्प्योयथा
तत्रद्वितीयपक्षोरूपतुल्यरूपाणिस्युःयतस्तथासतिसमशोधनेरूपाभावःस्यादितिनदाप्रागुक्तयुक्त्याद्वितीयवर्णमानमभिन्नंस्यात्।
परंद्वितीयपक्षरूपतुल्यानितृतीयपक्षरूपाणितदेवस्युर्यद्द्वितीयपक्षरूपपदेनयुतऊनोवान्यवर्णःकल्प्यते।यतस्तस्यवर्गेयथापू
र्वंरूपाणिस्युः।अतउक्तंनेनाहतोन्यवर्णोरूपपदेनान्वितःकल्प्यइति॥अन्वितइत्यूपलक्षणं॥ऊनोपिकल्प्यस्तुल्यरविशेषात्।ननुरू
पयुतेरूपोनेवान्यवर्णकल्पितेनस्यवर्गेक्रियमाणेन्यवर्णवर्गोभिन्यवर्णोरूपाणिवेतिरवेरुत्थयेस्यात्।तत्रसमशोधनेनरूपनाशेरवेरुत्थ
यमवशिष्येत।तत्रयद्यपिवर्णसकंप्रथमरवेरंप्राग्वद्युक्त्याहरभक्तंशुध्यतितथापिवर्णसकंद्वितीयरवेरंशुध्येदेवेतिकथमवगंतव्यमि
तिचेदुच्यते॥दृढप्रथमरवेरुत्थोन्यवर्णइतिकल्पितोकस्यरूतिर्भवतिद्वितीयरवेस्तुद्विगुणोत्यनिघ्नोपरेकइत्यनेनाकल्पितो
कोहाभ्यांरूपपदेनचगुणितोभवति।दृढरवेरुदयमापेक्ष्यथाहरभक्तंशुध्यतिनथोक्तःकल्प्यः।अतएवोक्तंयस्यरूतिर्हरभक्तंशुध्यतिअ
पिचसोकोद्विरूपपदगुणितोपिशुध्यतिनदातेनोकेनाहतोन्यवर्णःकल्प्यइति।हरगुणितान्यवर्णकल्पनेतुनकोपिविचारोस्ति।यतःसस्व
तएवहरभक्तःशुध्यतिइतिस्वगुणितोद्विरूपपदगुणितोवाऋणरोशुध्येत्।सोपीतियोपीतिपाठश्चेत्साधीयानूइतिप्रतिभाति।अथयद्द्वि
तीयपक्षरूपाणांपदंनलभ्यतेनदातृतीयपक्षरूपाणांद्वितीयपक्षरूपसाम्यंकथमपिनस्यात्।तृतीयपक्षेहिमूलदःकल्पनीयःन
तोस्यपदेनप्रथमपक्षसाम्यंविधेयमस्ति॥अतोत्ररूपैर्मूलदैरेवभाव्यं॥द्वितीयपक्षोमूलदःकल्पनीयः।ततोस्यपदेनप्रथमपक्षपर
साम्यंविधेयमस्ति॥अतोत्ररूपैर्मूलदैरेवभाव्यं॥द्वितीयपक्षेतुरूपाण्यमूलदानिसेनेतिकथमुभयोःपक्षयोःरूपसाम्येस्यात्॥अ
तएवनादृशेस्थलेसमशोधनोनरंरूपशेषणावश्यंभाव्यं॥अतस्तृतीयपक्षेरूपवर्गःस्तथाकल्प्योयथानस्याद्द्वितीयपक्षरूपैःसहो
नरमेकादिगुणितहरतुल्यंस्यात्॥अतस्तथासतिनच्छेषेहरभक्तंशुध्येदेवेतिद्वितीयवर्णमभिन्नंस्यात्॥अथतादृग्वर्गज्ञानार्थमु
पायः॥द्वितीयपक्षरूपेषुएकादिगुणितहरेषुजातेशोधितेवायोवर्गःस्यात्तस्यनेनसहोनरंगुणितहरतुल्यमेवस्यात्।अतस्तादृग्वर्गा
र्थंद्वितीयरूपपक्षेषुतावद्धरंक्षिपेत्॥यावद्वर्गःस्यात्॥तत्ररूपेषुहरतक्षेषुहरेष्वित्यनेनवर्गोधनंजेचयोगजंचफलंसिध्यतीतिला

पवादिरमेव वक्तुमुचितं। अनउक्तं नयादिपदं मूलाणीक्षिपेत्। धरेतेषु हारतेषु तावद्यावद्दुर्गो भवति। अस्य वर्गस्य पदेनान्वितो न्यवर्णः कल्प्यः इत्यर्थतः सिध्यति॥ अत्रेदमपि द्रष्टव्यं॥ यदि मूलानि हरतुल्यानि मूलदानात्पदेनान्वितो न्यवर्णः कल्प्य इति॥ उक्तयुक्तेरविशेषात्॥ अथैवं न्यूनेऽपि यदि वर्गो न स्यात्तदा नास्त्येवतादृशो वर्गो यस्य द्वितीयपक्षमूलैः सहोनैरमे काद्गुणितहरतुल्यं स्यादिति सिध्यति। एवं सति विकल्पमनउक्तं भवति नवेदमपि सिध्येत्कुतो न इति॥ अथ यत्र द्वित्र्यादिवर्गगुणितो वर्ग उद्दिष्टः स्यात्तत्र समशोधनमात्रेण पूर्वपक्षपदलाभात्पक्षौ नदेशेनाहत्येत्यादिना प्रथमपदेगृहीते द्वितीयपक्षे वर्णकोहरतुल्यो नस्यात्किंतु द्रष्टगुणितः स्यात्॥ मूलान्यपि क्षेपतुल्यानि नस्युः किंतु द्रष्टगुणितानि स्युरतस्तत्रापि प्रागुक्तयुक्त्या यस्य रूपतिगुणितहरतुल्येन द्वितीयवर्णकेनभक्तासती शुध्यतीत्यादिना न्यवर्णकल्पनं भवति॥ एवं सति हत्वाक्षिप्त्वा च पदंयत्राद्यस्येहभवति तत्रापि आलापित एव हरइति यदुक्तं तल्लाघवार्थं द्रष्टव्यं॥ ननु गुणितहरस्य ने केवलहरेक्ते पक्षसाम्यं कथंनिष्टेन्साम्याभावे च साम्यप्रागुक्तः शेषविधिः कथं स्यात्। अतआलापित एव हरइति यदुक्तं तदशुद्धं॥ अथवेह ग्रामाणिकमालाघवमुररीक्रियतेनहि हरार्धाधिकमपि कथंनगृह्यते कथंवा रूपाण्यपि भगुणानान्येव नगृह्यते॥ उच्यते॥ आलापितेहरेपिगृहीते पक्षसाम्यं नहीयते नथाहि वर्गेद्वित्र्यादिगुणितउद्दिष्टे सतितस्मिन्प्रमाणंगुणकभक्तः कालकः कालकः कल्प्यते। अथायं हरगुणितः सन्द्वितीयपक्षेभवतीतिप्राग्द्वितीयपक्षेहर एववर्णकः स्यात्॥ परमुद्दिष्टगुणकस्तस्यछेदः स्यात्। अथसमछेदीकरणायअनेनछेदेनपूर्वपक्षस्यगुणनेकर्तव्येउद्दिष्टगुणेनयावद्वर्गस्य भूयोगुणनंनभवतीतिगुणवर्गगुणितोयावद्वर्गोभवतिक्षेपस्तुसमछेदीकरणावसरएवगुण्यनइतिक्षेपतुल्यानिरूपाणिगुणकगुणितानिभवंति। अथछेदगमेकृतेसमशोधनेनतादृग्रूपाणांद्वितीयपक्षगमनेसतिप्रथमपक्षस्यमूलदकालपदेगृहीतेसतिद्वितीयपक्षेकेवलहरोवर्णकोभवतिरूपाणितुगुणितानिभवंतिअतआद्येरूपैकल्पनश्रमंपरित्यज्यकालकमेवलब्धिप्रमाणंप्रकल्प्यशेषविधिनासिध्येद्द्वितीयपक्षेगुणितहरस्यानेकेवलहरग्रहणमुक्तंलाघवात्॥ ननुतथापिआलापितएवहरइत्यवधारणमयुक्तं। गुणितहरग्रहणेष्टसिध्येरितिचेत्। सत्यं॥ यत्राद्यस्यपक्षस्यहत्वाक्षिप्त्वाचपदंभवतितत्रापिआ

८१

लापितएवहरोग्राह्यः। किंगुणितहरेणेतिवाक्यपर्यवसानस्यविवक्षितत्वात्। अवधारणेनुविवक्षितेआलापितएवहरोग्राह्योनगुणितइतिवाक्यपर्यवसानंस्यात्॥ अत्रक्षिप्तेइतियदुक्तंतत्प्रथमराश्यौसरूपेक्षिप्तेसतिद्रष्टव्यं॥ यद्यूपपक्षौनदेशेननिहत्यकिंक्षेप्यंनयोरित्येतदर्थकमाद्यसूत्रस्यस्मारकंहत्वाक्षिप्त्वेति। तथाचायमर्थः॥ यस्मिन्सूत्रेहत्वाक्षिप्त्वेत्यादिनापदंग्रहणमुक्तं॥ तत्सूत्रप्रवृत्तिपूर्वकंयत्राद्यस्यपदंभवतीति॥ एवं घनकृतेकेयोज्योनद्यथा॥ तत्राप्युक्तवद्द्वितीयपक्षेहरएववर्णकोभवतितत्रारूपाणामभावेहरभक्तानोनेषांभुधौवायस्यघनोहरभक्तःशुध्यतिनोकेनहतोन्यवर्णःकल्प्यः। यदितुरूपाणांघनमूलेनलभ्येतनदानेषुरूपेषुहरतुल्येषुतावत्क्षेपेद्यावद्ऊनोभवेत्॥ एवमपिसतियावदूनोनभवेत्तदानदुद्दिष्टेरिवकेशेयं। अथरूपपदेनान्वितस्यकल्प्यमानवर्णस्यघनेस्थाप्योघनोत्यस्येत्यादिवत्तत्रिखंडानिभवंति। तत्रारूपात्मकस्यचतुर्थखंडस्यकल्प्यमानवर्णस्यप्रागुक्तयुक्त्याशुध्यभवति। अथत्रयाणांशेषखंडानांहरभक्तानांयथाशुध्यिर्भवतितथोक्तकल्प्यः। तत्रप्रथमखंडेकल्प्यमानोकस्यघनोभवेत्। द्वितीयेतस्यवर्गोरूपघनपदेनत्रिभिश्चगुणितोभवेत्॥ तृतीयेरूपघनपदस्यवर्गेणत्रिभिश्चगुणितोभवेत्। अतोयस्यघनोहरभक्तःशुध्यतिअपिचयस्यचवर्गेत्रिरूपपदगुणितोहरभक्तःशुध्यतिअपियोरूपपदवर्गेणत्रिभिश्चगुणितोहरभक्तःशुध्यतितेनोकेनाहतोन्यवर्णःकल्प्यः। हरगुणितान्यवर्णकल्पनेनकोविचारः। वर्गकृदेकेयदिलब्धप्रमाणेकालकवर्गःकल्प्यतेनदान्यवर्णकल्पनेविनैवसुखेनोद्दाहरणासिध्यतिरस्ति। यतस्तत्राद्यपक्षपदंगृहीतेद्वितीयपक्षस्यवर्गप्रक्षेपदमायाति। एवंसत्यपियदन्यथायतिनमानार्थैस्तद्वर्गगतालब्धावपिउदाहरणसिध्यर्थमित्यादिसुधीभिरूह्यं॥ अथघनकृदेकोदाहरणमनुष्टुभाह॥ षड्द्वियूनोघनःकस्यपंचभक्तोविशुध्यति। नवदस्तिनवातेवेदभ्यासोघनकृदेके॥ १०५॥ स्पष्टोर्थः। गणितमाकरेस्पष्टं॥ अथहत्वाक्षिप्त्वेत्यस्योदाहरणमनुष्टुभाह॥ यद्वर्गःपंचभिःशुण्याक्षियुक्तःषोडशोध्नः। शुध्यतिमेतिसामचेत्वंदक्षोसिगणितेनयदि॥ १०६॥ स्पष्टोर्थः॥ गणितमाकरेव्यक्तं॥ दैवज्ञवर्यगणसेवननिरूपितेन श्रीपार्श्वबल्लाळसंज्ञगणकात्मजनिर्मितेस्मिन्॥ बीजक्रियाविवृतिकल्पलतावतारे भूमध्यमाहरणमेतदनेकवर्णं॥ १०७॥ इतिश्रीलक्ष्मीदैवज्ञविरचितेऽनेकवर्णमध्यमाहरणविवरणं॥ ॥ अत्र ४९० आर्यादिः ४३१८

अथक्रमप्राप्तं भाविनं क्षेत्रमनेकवर्णविशेषमुपलक्षणिकमाह॥मुखेष्ववर्णो। सुधीभिरपरेषां कल्पनामानानियथोपपन्नानि॥तथा
चैवंविधेनभंगएवंस्यात्सर्वत्रापि॥८॥स्पष्टार्थमिदंविवृतमाचार्यैः॥हीनाद्यादिराशीनांव्यक्तकल्पनेनअस्यानि
यमस्यैकवर्णसमीकरणोनर्गतानुपपत्तिरत्रनदुपपत्तिरेव॥अथोदाहरणमनुष्टुभाह॥चतुस्त्रिगुणयोराश्योः संयुतिर्द्वियुतान
योः॥राशिघातेनतुल्यास्याद्गौरा शीवेत्सिचेदूह॥॥स्पष्टोर्थः॥गणितमाकरेस्पष्टं॥उदाहरणंनरमनुष्टुभाह॥चतुरोराशय
कैश्चयोगोनरसंगुणः॥सर्वराशिहतेस्तुल्योभाविनक्षेत्रनिगद्यतां॥॥स्पष्टोर्थः॥गणितमाकरेस्पष्टं॥शिष्यबुद्धिप्रसारार्थमन्य
दुदाहरणंसूत्रंशार्दूलविक्रीडितेनाह॥योराशीकृतकत्रयाद्विहतियैराशिभिर्हीनयैराशिर्यैर्गुणितश्चतैश्चसहितैः क्षेत्रे
तिःपंचाशच्चतुराहतावदधिकंयत्तद्राशियुग्मेष्टकाभिन्नमंवेहिवत्सगणकःकरत्नसमोसिद्धितो॥ स्पष्टोर्थः॥गणितमाकरे
स्पष्टं॥अनएकस्मिन्राशौव्यक्तेकल्पितेहीनयोराशिर्वेष्टकाभिर्भक्तएवायानिकदाचिदभिन्नौपि॥अतोभिन्नराशिसिद्धिर्म
हत्यासेनभवति॥तदर्थंयथाल्पायासेनराशिमानमभिन्नंसिध्यतितथासाधनुष्टुप्पूर्वयेनाह॥वर्णोक्षहानिरूपेक्वभक्ते
ष्टेनेष्टकक्षे॥एताभ्यांसंयुतोनोकर्णोस्वेष्टयाचतौ॥९॥वर्णोक्षवर्णयोर्मानेज्ञातव्येतेविपर्ययात्॥९१॥स्पष्टोर्थः॥अ
त्राचार्यश्रीरत्नशेखरः॥अत्रोपपत्तिराचार्यैर्दर्शितापिकिंतुतेरत्नकादिदोषात्उपदेशाविधित्वाच्चसंप्रतिसानस्वकार्यक्ष
मा॥अतएवंभाविनोपपत्तिर्विधिर्व्याख्यायते॥तत्रत्रयचतुस्त्रिगुणयोराश्योर्हितिप्रथमोदाहरणेयथोक्तौज्ञातौपक्षौ॥
या ४ का १ रू २ अथवोपक्षयोस्तुल्यत्वंतूपदेवयावन्नावत्कालकभाविनस्यमानंनदेवयावन्नावच्चतुष्टयकालकत्रयरूपंदृश्ययोः मा
का भा १ नं। भाविनंक्षेत्रसमकर्णंयावच्चतुर्भुजक्षेत्रफलं॥तत्रकर्णेभुजकोटिदर्शनं [कर्ण, भुज, कोटि] समश्रुतौतुल्यंचतुर्भुजेचनथा
चनेनऋजुकोटिपार्श्वः॥तेनज्ञानंक्षेत्रफलेयाकाभा १ रू २ क्षेत्रगतमकोष्टमानंस्थितेन [रूपाणि, का] समभिदंया २ का ३ रू २ तथाक्षे
त्रंतावद्यावच्चतुष्टयंकालकत्रयंरूपद्वयंचास्ति॥तत्रक्षेत्रमध्येयावन्नावच्चतुष्टयस्यस्थानं [रूपका] अथशेषक्षेत्रसंपू
र्णैःकालकोद्दर्शयितुमशक्येः॥यतोहीर्घभुजोत्रकालकमानं॥सचयावन्नावच्चतुष्टयापनयेनरूपंचतुष्टयोनोदृश्यते॥रूप

चतुष्टयोनकालकस्यत्रयंदृश्यते [रूपाणि] रूहकालकेषुप्रत्येकंयावन्नावदेकतुल्यानिरूपाणि ४ न्यूनानिसेतानिकालकत्रयस्यज्ञा
निकालकोकगुणितानिन्यूनानि १२ अथयदिभाविनक्षेत्रात्प्रथमतःकालकत्रयमपनीयतेतर्हिकालकतुल्यंरूपैं ३ रूनंयावन्नावत्तोलघु
भुजस्यमानंदृश्यते। अतोरूपत्रयोनस्य ३ यावन्नावच्चतुष्टयप्रदर्शने [रूपाणि, यावन्नावत्] रूहयावन्नावत्सप्रत्येकंकालकोकतुल्यानि ३ रूपाणिन्यू
नानिसेतानियावन्नावच्चतुष्टयस्यज्ञातानिचतुर्गुणितानि १२ न्यूनानिउ [रूपाणि] भयथापिवर्णीकाहनितुल्येरूपैंरूनेयावन्नावच्चतुष्टयं
कालकत्रयेचक्षेत्रमध्येप्रदर्शितंभवति॥अथयदिसंकीर्णमेवयावन्नावच्चतुष्टयं कालकत्रयेचप्रदर्श्यतेनदेवंदृश्यतेभवति [रूपाणि]
रूहयेकोष्टकाउत्पद्यंतेसावर्णीकाभिर्हनिरेव॥अथवर्णीकाहनितुल्यास्तेकोणकोष्टकायदिकालकत्रयमध्येगण्यंतेतदायावन्ना
वच्चतुष्टयार्थंनावंतएवकोष्टकाअपेक्षिताः यदितुयावन्नावच्चतुष्टयमध्येगण्यंतेतदाकालकत्रयार्थंनावंतएवकोष्टकाअपेक्षिताः उभ
यथापिक्षेत्रशेषखंडेयदिवर्णीकाहनितुल्याःकोष्टकागृह्यंतेसंपूर्णंयावन्नावच्चतुष्टयंसंपूर्णंकालकत्रयंचभवति। भाविनसमपक्षेत्रं
यावन्नावच्चतुष्टयंकालकत्रयंरूपद्वयंचवर्णनेनःक्षेत्रशेषवर्णीकाहत्यारूपद्वयेनचभाज्येकथमन्यथाद्वितीयपक्षोभाविनसमः स्यात्
तस्माद्भाविनक्षेत्रोनर्गतकोणस्थेलघुक्षेत्रेवर्णीकाहनिरूपैक्यतुल्याःकोष्टकाःसेतीतिसिध्यं॥तेचनस्थलघुक्षेत्रस्यफलेनऋजयोर्व
धाज्ज्ञाने। अतइष्टमेकंमकंभुजंप्रकल्प्यतेनक्षेत्रफलेभक्तेयल्लभ्यतेनद्वितीयोभुजःस्यात्॥अथाभ्यांभुजाभ्यांयावन्नावत्कालक
योर्मानंज्ञानेनकिंचित्कार्यंशिष्टमस्ति। तथाहि॥यतोयावन्नावदेकतुल्यैरूपैर्युतःसन्कालकोकः ९ कालकमानंस्यात्एवंकालको
कतुल्यैरूपैर्युतोनोयावन्नावद्वयंतल्लघुक्षेत्रस्यद्वितीयोभुजोस्ति॥अतोसौकालकोकतुल्यैरूपैर्युतःसन्यावन्नावन्मानंस्यात्॥अत्रे
ष्टंयदिकालकस्वेष्टात्मकस्यभुजस्यमानंकल्प्यतेनदानेनक्षेत्रफलेभक्तेयत्फलंतद्यावन्नावत्स्वेष्टात्मकस्यद्वितीयभुजस्यमा
नंस्यात्॥अतइष्टंयावन्नावदेकयुतंकालकमानंस्यात्॥यदितुइष्टंयावत्स्वेष्टात्मकस्यभुजस्यमानंकल्प्यतेनदाफलंकालकस्वेष्ट
त्मकंस्यात्॥नेस्यात्॥अतइष्टंकालकोकयुतंयावन्नावन्मानंस्यात्फलंयावन्नावदेकयुतंकालकमानंस्यादिति। अनउपपन्नमि
ष्टमिष्टफलाभ्यांस्वेच्छयासंयुतोवर्णीकोव्यत्ययाद्रूपैर्मानेज्ञातव्येइति॥अथवान्यथोपपत्तिः। भाविनक्षेत्रोनर्गतक्षेत्रस्यभुजयो

अथैकमप्राप्तं भावितसंज्ञमनेकवर्णविशेषमुपजानिकयाह॥मुक्तेष्टवर्णे। सुधीयापरेषां कल्पानिमानानियथोक्तानि॥तथा भवेद्भावितभंगएवंस्याद्यावत्तावत्क्रियायेष्टसिद्धिः॥८॥स्पष्टार्थमिदंविवृतमाचार्यैः॥हीनायादिराशीनांव्यक्तकल्पनेनअस्यविषयस्येकवर्णसमीकरणोनर्गत्वादुपपत्तिरत्रनदुपपत्तिरेव॥अत्रोदाहरणमनुष्टुभाह॥चतुस्त्रिगुणयोराश्योःसंयुतिर्द्वियुतानयोः॥राशिघातेनतुल्यास्याद्योराशीवेत्सिचेद्वद॥॥स्पष्टोर्थः॥गणितमाकरेस्पष्टं॥उदाहरणांतरमनुष्टुभाह॥चत्वारोराशयःकेनयोगेनरूपसंगुणाः॥सर्वराशिहतेस्तुल्याभावितज्ञनिगद्यतां॥॥स्पष्टोर्थः॥गणितमाकरेस्पष्टं॥शिष्यबुद्धिप्रसारार्थमन्यदुदाहरणद्वयंशार्दूलविक्रीडितेनाह॥योराशीकिलयाचराशिनिहतियेराशिवर्गैतथानेषामैक्यपदंसराशियुगळंनानैत्रयोविंशतिःपंचाशत्रियुताथवाबदकियत्तद्राशियुग्मंपृथक्तद्भिन्नमंवेहिवत्सगणकःकरत्वंसमोसिद्धितो॥स्पष्टार्थः॥गणितमाकरेस्पष्टं॥अत्रएकस्मिन्राशौव्यक्तेकल्पितेद्वितीयोराशिर्बहुधाभिन्नएवायातिकदाचिदभिन्नोपि॥अतोभिन्नराशिसिद्धिर्महायासेनभवति॥तदर्थंयथात्मायासेनराशिमानमभिन्नंसिध्यतितथासार्धानुष्टुभेनाह॥वर्णोकाहतिरूपैक्यंभक्तेष्टेनेष्टफळे॥एताभ्यांसंयुतावूनौकर्तव्यौस्वेच्छयाचतौ॥९०॥वर्णौकौवर्णयोर्मानेज्ञातव्येतेविपर्ययात्॥९१॥स्पष्टोर्थः॥आचार्यैर्व्याख्यातश्च॥अत्रोपपत्तिराचार्यैर्लिखितानास्तिकिंतुलेखकादिदोषात्उपदेशाविच्छित्याचसंप्रतिसानस्वकार्यक्षमा॥अतइयंभावितोपपत्तिर्विविच्योच्यते॥ननुत्रचतुस्त्रिगुणयोराश्योरित्यादिनाप्रथमोदाहरणेयथोक्तोनोपपन्नो॥॥

या ४ का ३ रू २ अनयोःपक्षयोस्तुल्यत्वात्यदेवयावत्तावत्कालकभावितस्यमानंतदेवयावत्तावच्चतुष्टयकालकत्रयरूपद्वययोगमा
या का भा १ नं। भावितंचसमंकर्णायत्चतुर्भुजक्षेत्रफलं॥तत्रकर्णेभुजकोटिदर्शनं या का | या का | समश्रुतेतुल्यंचतुर्भुजेचतथा
यतेनऋजुकोटिघातःश्रुतिजानंक्षेत्रफलं॥याकाभा १ इदंक्षेत्रगतमकोष्टमानंऐक्येन | सममिदंया ४ का ३ रू २ तथाक्षे
त्रोतयीवत्तावच्चतुष्टयंकालकत्रयंरूपद्वयंचास्ति॥तत्रक्षेत्रमध्येयावत्तावच्चतुष्टयस्यदर्शनं | रू २ का १ | अथशेषक्षेत्रसंपूर्णःकालकोदर्शयितुमशक्येः॥यतोहीर्घभुजोत्रकालकमाने॥सचयावत्तावच्चतुष्टयापनयेननरूपचतुष्टयोनोदृश्यते॥रूप

चतुष्टयोनकालकस्यत्रयंदृश्यते | इह कालकेषुप्रत्येकंयावत्तावदेककुत्स्यानिरूपाणि ४ न्यूनानिसंतीतिकालकत्रयस्यजातानिकालकोकगुणितानिन्यूनानि १२ अथयदिभावितक्षेत्रात्प्रथमतःकालकत्रयमपनीयतेतर्हिकालकतुल्यरूपे ३ ऊनंयावत्तावत्तोलघु
भुजस्यमानंदृश्यते। अतोरूपत्रयोनस्य ३ यावत्तावच्चतुष्टयप्रदर्श्यते | इह यावत्तावत्सप्रत्येककालकोककुत्स्यानि ३ रूपाणिन्यूनानिसंतीतियावत्तावच्चतुष्टयस्यजातानिचतुर्गुणितानि १२ न्यूनानि ३ | भयथापिवर्णीकाहतिकुत्स्यैरूपैरूनेयावत्तावच्चतुष्टयं
कालकत्रयंचक्षेत्रमध्येप्रदर्शितंभवति। अथयदिसंकीर्णमेवयावत्तावच्चतुष्टयं कालकत्रयंचप्रदर्श्यतेनदेवंदर्शनंभवति
इहयेकोष्टकाउत्पद्यंतेतेसावर्णीकाभिर्हतिरेव॥अथवर्णीकाहतिकुत्स्यास्तेकोणकोष्टकायदिकालकत्रयमध्येगण्यंतेतदायावत्तावच्चतुष्टयार्थंतावंतएवकोष्टकाअपेक्षिताः यदितुयावत्तावच्चतुष्टयमध्येगण्यंतेतदाकालकत्रयार्थंतावंतएवकोष्टकाअपेक्षिताः उभयथापिक्षेत्रशेषखंडेयदिवर्णीकाहतिकुत्स्याःकोष्टकाःस्युस्तेसंपूर्णायावत्तावच्चतुष्टयेसंपूर्णंकालकत्रयंचभवति। भावितसमपक्षेचयावत्तावच्चतुष्टयंकालकत्रयंरूपद्वयंचबर्त्ततेनःक्षेत्रशेषवर्णीकाहत्यारूपद्वयेनचभाव्यंकथमन्यथाद्वितीयपक्षोभावितसमःस्यात्तस्माद्भावितक्षेत्रोनर्गतकोणस्थैलघुक्षेत्रैर्वर्णीकाहतिरूपैक्यंतुल्याःकोष्टकाःसेनीतिसिद्धं॥तैश्चनस्थूलघुक्षेत्रस्यफलंनभुजयोर्वधाज्ज्ञानं। अतइष्टमेकंमेकंभुजंप्रकल्प्यतेनक्षेत्रफलेभक्तेयत्फलंतेनद्वितीयोभुजःस्यात्॥अथाभ्यांभुजाभ्यांयावत्तावत्कालकत्रयोनंज्ञानेनकिंचित्कार्यमस्तिनवाहि॥यतोयावत्तावदेककुत्स्येरूपैर्युतःसन्कालकोकःकालकमानंस्यात्तत्रैवकालकोककुत्स्येरूपैर्युतोनोयावत्तावद्गुणितलघुक्षेत्रस्यद्वितीयोभुजोस्ति॥अतोसौकालकोककुत्स्येरूपैर्युतःसन्यावत्तावन्मानंस्यात्॥अत्रेष्टंयदिकालकत्रयात्मकस्यभुजस्यमानंकल्प्यतेतदानेनक्षेत्रफलेभक्तेयत्फलंतद्यावत्तावत्त्रयात्मकस्यद्वितीयभुजस्यमानंस्यात्॥अतइष्टंयावत्तावदेककुत्स्यंकालकमानंस्यात्॥यदितुइष्टंयावत्त्रयात्मकस्यभुजस्यमानंकल्प्यतेतदाफलंकालकत्रयात्मकंस्यात्॥नस्यात्॥अतइष्टंकालकोककुत्स्ययावत्तावन्मानंस्यात्तत्फलंयावत्तावदेककुत्स्यंकालकमानंस्यादिति।अतउपपन्नमिष्टमिष्टफलाभ्यांस्वेच्छयासंयुतोवर्णीकोव्यस्तयाहूर्णमानेज्ञातव्येइति॥अथवान्यथोपपत्तिः।भावितक्षेत्रोनर्गतक्षेत्रस्यभुजयो

र्मानेअन्यवर्णेकल्पितोदर्शने रूपाणि रूपाणि रूपाणि

नेन कालकं कोस्यश्लेश्रस्य एकोभुजोक्ति। अतोनेनयावन्मात्रंकेनऊनःसन्कालकमानंभवेत्। भुजोतुइष्टतत्कले।तत्कलेष्टवा।अ
तइष्टतत्कलाभ्यांस्वेछयोनोवर्णोकोव्यस्तयान्मानेभवतइत्युपपन्नं। तदेवमयंनिष्कृष्टोर्थः॥ यदिभावितसमेपक्षेरूपाणि धनं
स्युस्तदाइष्टतत्कलाभ्यांवर्णकोधनमर्णवायथाबत्संयुक्तावेवव्यस्तयान्मानेभवतः।यदिरूपाणिऋणंतत्कलाभ्यांस्वेछयासंयुता
वूनोवर्णकोव्यस्तयान्मानेभवतः।अस्मिन्पक्षेवर्णकयोर्धनत्वमेव। नहिश्रयाणांऋणत्वेवर्णमानंधनंसंभवतिऋणेवावर्णी
मानेसतीकानांप्रतीतिरस्ति।अत्रापरोविशेषः।यत्रसंयुतवर्णकज्ञेचमाने उपपन्नेभवतस्तत्रउभयेपिग्राह्ये।अन्यत्रतुये उपप
न्नेनेवग्राह्ये। इतिभावितोपपत्तिः॥ अत्रत्रयाणामपिधनत्वेचतुस्त्रिगुणयोराश्योरित्यादाहरणेप्रदर्शितं॥ अथयत्रवर्णकोध
नंरूपाणितुऋणंस्यात्तादृशमुदाहरणमनुष्टुभाह॥ द्विगुणेनकयोराश्योर्घातेनसदृशंभवेत्॥ दशेंदाहतराश्यैक्यंह्यनष्टवि
वर्जितं॥१२०॥स्पष्टोर्थः। गणितमाकरेस्पष्टं॥ अथयत्रवर्णकावर्णरूपाणितुधनंस्युस्तादृशमुदाहरणमनुष्टुभाह॥ त्रिपं
चगुणराशिभ्यांयुतोराश्योर्वधः कयोर्नष्टसप्तभिर्मितोजातोराशी।वेत्सिचेद्वद॥२१॥स्पष्टोर्थः। गणितमाकरेस्पष्टं॥ अथय
त्ररूपाणामृणत्वेप्रकारद्वयेनोपपन्नमानयोरेकतरेणैवउपपन्नेभवतस्तादृशमुदाहरणंपूर्वचतुर्थमासीतिनदेवप्रदर्श
यति॥ योराशीकीकयावराशिनेहानिरित्यादि। गणितंस्पष्टमाकरे। दैवज्ञवर्यगणसंततसेव्यपार्श्वबल्लालसंज्ञगणका
त्मजनिर्मितेस्मिन्॥ बीजक्रियाविरहितंकल्पलतावतारेभूद्भावितंसकलमेतदनेकवर्णे॥११॥इतिश्रीसकलगणकसार्व
भौमश्रीबल्लाळदैवज्ञसूनुगणकविरचिते बीजक्रियाविरहितं कल्पलतावतारेनेकवर्णभावितविवरणं॥ भ्रत्र२४५
२५८इत्येकवर्णसमीकरणविवरणसमाप्तिं वसंततिलकयाह॥आस्सीन्महेश्वरइतिप्रथितःपृथिव्यांमाचार्यवर्यप
दवीविदुषांप्रयातः॥लब्धावबोधकलिकोनतएवचक्रेतज्जेनबीजगणितंलघुभास्करेण॥लघ्विति छेदः॥स्पष्टोर्थः
ननुबीजगणितानिब्रह्मगुप्तादिभिःप्रतिपादितानिसंतिनकिमर्थमाचार्येणतन्निरर्थकयाइंद्रवज्रयोत्तरमाह॥
ब्रह्मादयःश्रीधरपद्मनाभबीजानियस्मादतिविस्तृतानि॥आदायतत्सारमकारिनूनंसघुक्रियायुक्तंलघुशिष्यतुष्टै

८४

अत्रापिलघ्विति छेदः॥ शेषंस्पष्टं॥ कथमिदंलघ्वित्याशंक्यायंमनुष्टुप्पूर्वार्धेनाह॥ अत्रानुष्टुप्सहस्रंहिसूत्रोद्देशकोमितिः
हियतःकारणात्अत्रसूत्रोद्देशकेबीजगणितेअनुष्टुप्सहस्रमितिः॥ पूर्वबीजगणितेषुनुसहस्रंहृयत्रयादिमितिरस्ति
अतोलघ्विदमित्यर्थः॥ नन्विदमपिविस्तृतमस्तिकुत्रचित्॥ क्वचिदेकस्मिन्विषयेउदाहरणबाहुल्यंकेचित्याशंक्यायंमनुष्टुप्
पूर्वेणनिरर्थाभ्यामाह॥ क्वचित्॥ सूत्रार्थविषयंव्याप्तिंदर्शयितुंक्वचित्॥ क्वचिच्चकल्पनाभेदंक्वचिद्यानिमुदाहृतं॥ क्वचित्सू
त्रार्थविषयंदर्शयितुमुदाहृतं॥ यथाभावितेचतुस्त्रिगुणयोराश्योरितित्रिपंचगुणराशिभ्यामितियोराशीकयाचराशिनिह
तिरित्युदाहरणचतुष्टयमुदाहृतं॥ नस्तेकस्मिन्नुदाहृतेभावितंप्रभाभीष्टादितिसूत्रस्यार्थः॥ सर्वोपिविषयीभवति। तस्मा
दत्रोपसूत्रार्थदर्शयितुंउदाहरणचतुष्टयमप्यावश्यकं॥ एवंकुट्टिकाद्यामिंदर्शयितुमुदाहृते॥ यथापेवकुट्टानदन्तधनादित्यु
दाहृत्यएकट्टानदन्तधनतःइतियावत्समभेवपुनरुदाहृतं॥ इदंयदिनोदाहृतेनहिस्वरूपप्रकारविशेषोमेदानोविश्वासोन
भवेदित्येनदवश्यकं॥ एवंकल्पनाभेदंदर्शयितुं॥ एकोत्रबीजेतिममदेहीत्युदाहरणमेकवर्णसमीकरणउदाहृतं॥ एवंविधयुक्ति
प्रदर्शनार्थमपिबहूपन्यासेष्वेषुहृतमस्ति॥ तस्मादयंविस्तरोनदोषाय॥ ननुपूर्वबीजेषूदाहरणानिबहूनिसंतिइहतुस्वल्पान्येवो
क्तानीतिनसकलदोषहरणवचनम॥ स्यादेवमत्रोच्यतेनह्युदाहरणोक्तौनास्तिश्लोकमुक्तमिदंयतः॥ हियतःउदाहरणोक्तौनास्ति
अतइदंश्लोकंस्वल्पमुक्तं॥ पूर्वबीजेष्वपिसकलान्युदाहरणानिनैवोक्तानि॥ तेषामानंतत्वेनवक्तुमशक्यत्वात्। अतोत्रैर
पिउदाहरणैर्विविधयुक्तिषुप्रदर्शितासुशेषंव्यर्थमितिभावः॥ नन्वत्रस्वल्पमुक्तं पूर्वबीजानितुअतिविस्तृतानिअतस्तान्ये
वमंदप्रयोजनायाल्पमित्याशंक्यायमाह॥ यतःदुस्तरश्लोकबुद्धीनांशास्त्रविस्तारवारिधिः॥ अथवाशास्त्रविस्तरयाकिंकार्यं
सुधियामथ॥९५॥ योहिविस्तरसमंदबोधार्थंसबुध्यर्थंवा॥ नाद्यः। यतःशास्त्रविस्तारवारिधिःश्लोकबुद्धीनांमंदानां
दुस्तरोदुर्बोधइतियावत्॥ यतोमहतिग्रंथेयत्नकिंकुत्रास्तिकिमत्रकर्तव्यमित्यनवबोधेनइतिकर्तव्यतायोमूढाए
वस्युः। नांत्यः। सुधियामपिशास्त्रविस्तरयाकिंकार्यं यतश्लोकल्पनासमर्थाः। ननुलघ्वपिबीजंमंदार्थंसुबुध्यर्थं वा। ना

घः।नेत्रानुमशक्यत्वात्॥नोत्यःनेषंकल्पकत्वादिनिचेत्॥न॥स्वयंग्रथस्यमेदानोंअभ्यासःसाध्यत्वाभावप्रथमपक्षेदोषः।द्वितीयेपिनदूषणमित्याह॥उपदेशलवंशास्त्रंकुरुतेधीमतोयथः॥ननुप्राप्येवविस्तारंस्वयमेवोपगच्छति॥नहिस्फुधियोपिकिंचिदनधीत्यजानंति।अतइदंमदुक्तंसर्वसाधारणंप्रयोजनायेतिसर्वेरपिपठनीयमितिभावः।ननुशास्त्रंसुधियेप्राप्यस्वयमेवविस्तारंगच्छतीतिकथमित्याशंक्यायंदृष्टांतमाह॥जलेनेकंस्वळेगुरुस्यंपात्रेदानंमनागपि॥प्राज्ञेशास्त्रंस्वयंयातिविस्तारंवस्तुशालिनः॥स्पष्टोर्थः॥एवंस्वकृतस्यास्यबीजस्यगुणान्युक्त्यासंस्थाप्योपसंहरति।गणकभणितिरम्यंबालबोधावगम्यंसकलगणितसारंसोपपत्तिप्रकारं॥इतिबहुगुणयुक्तंसर्वदोषैर्विमुक्तंपठपठमितिहृद्यैरुद्धिरंसर्वसिद्ध्यै।गणकेतिसंबोधनं।भणतरात्मजेतिरम्यंपरलोकेत्यर्थः॥शेषंस्पष्टं॥अभूत्पृथिव्यांप्रथितोगुणोघैश्चिंतामणिर्दैवविदांवरिष्टः।संपूजनानेहसियस्यगोत्रेस्फुजिध्वजस्मात्प्रत्यहमाविरासीत्॥तत्सूनवःपंचबभूवुरेषांज्येष्ठोभिरामःकिलरामरामः।भविष्यदर्थज्ञतयाहिनस्यविदर्भराजोपिनिदेशवर्ती॥रामादभूत्तोसितायांपुत्रौकुशळबाभिधौ॥त्रिमल्लगोपिराजश्वगुणैःसर्वैःसमन्वितो॥त्रिमल्लसूनुर्ज॰ विव॥यतिर्द्विजेंद्रोबलभद्रसंज्ञःशितिकंठभक्तः॥यःसंततंरुद्रजपानिसंगाद्रुद्रंमहोमूर्त्तमिवावभाति॥दैवज्ञवर्यगणसंततसेव्यपार्श्वबलभद्रसंज्ञगणकस्यसूनोस्तिलकस्य॥रामानुजःसपरमेश्वरतुष्टिहेतोर्बीजक्रियाविवृतिकल्पलतामकार्षीत्॥९॥यद्वास्करेणनिजधामगुणातिरेकात्संपादितंसगुणवर्णधनंहिबीजं॥तत्फुल्लभूमिमधिगम्यविचारवारिसंसिक्तमंकुरयतिस्मभवत्समर्थं॥९॥येयैःश्रमेर्विवरितोस्तिनवांकुरोसौतेषामभिज्ञहृदकःपरमास्तनोन्यः॥इतिविचिंत्यजगदीशनंवेबनुष्येसर्वज्ञतेचरणयोरिहनस्तनोस्ति॥७॥इतिश्रीलक्षदैवज्ञलक्षबलभद्रविरचितेः॥आदितः४५०० शके १७४७ पार्थिवनामसंवत्सरेभाद्रपदशुक्ल५ ॥सभाजालिखितं॥

८५

Digitized with financial assistance from the Government of Maharashtra on 11 June, 2017

॥ इतिबीजविवृतिसमाप्तः॥